PUBLISHED BY

B. M. APTE, for Apte Bros.
Mohan Building, Bombay No. 4.

PRINTED BY

G. G. T[illegible]kar, Manager, Vijaya Press,
670 Shanwar, Poona No. 2.

in prose and verse are almost alternate, and miscellaneous verses have been added at the end of each Series, being intended to be learnt by heart by the student. In adapting stories, as in the tale of Pururavas and Urvasi or of Sâvitri, I have tried to retain as far as possible, the language of the original, making changes only where absolutely necessary. Difficult words and expressions have been explained in the notes, but mere words have not been given as Sanskrit-English Dictionaries are now accessible to even the poorest student. At the end is an appendix giving the Questions in Sanskrit set at the Matriculation Examination of the University of Bombay from 1802 to 1890. Thus the book is intended to supply the want of a Sanskrit reading book hitherto felt by senior students in High Schools and will, I hope, give them some familiarity with the styles and modes of thought, of at least, the more celebrated writers.

Any suggestion as to improvement &c. will be thankfully received.

Poona, 31th January, 1891. V. S. APTE.

PREFACE TO THE SECOND EDITION.

This edition does not materially differ from first. The only changes made are in the order the lessons, the easiest ones being placed first. additional notes on points found to require in the course of teaching have been The appendix given at the end of the first

edition has been altogether omitted. The changes mentioned above were the only ones which the author intended to make in the second edition.

Dhulia.
3rd December, 1892. } M. S. APTE.

PREFACE TO THE THIRD EDITION.

The rapid sale of the first two editions has encouraged the Editor to give the public the third edition of this book and in doing so he has omitted such of the extracts as he thought difficult for an ordinary student of Sanskrit to understand He has also added a few more explanatory notes in places where considered to be necessary for clear elucidation of the texts. It is hoped that this edition will receive that support which was accorded to the first two.

Dhulia.
1893. } M. S. APTE

PREFACE TO THE FOURTH EDITION.

Nothing new has been done in this edition except that a fe[illegible] from [illegible] ex[illegible]

25th July, 1901. } M. S. APTE

PREFACE TO THE TWENTY-FIRST EDITION

This is a mere reprint of the twentieth Edition.

Bombay,
1st January, 1930. } B M. APTE

CONTENTS.

FIRST SERIES.

SECOND SERIES.

THIRD SERIES.

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति ॥ २॥

तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कार्यम् । अथ तस्य तं निश्चयं ज्ञात्वानागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन । अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तज्जलाशयमालोड्य यद्भविष्येण सह जलाशयो निर्मत्स्यतां नीतः । अतोऽहं ब्रवीमि ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ३ ॥

Panchatantra I.

II.

The vulture and the cat.

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचिदुद्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तं कोऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतोऽस्मि । अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्भवतु । तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्याब्रवीत् । आर्य त्वामभिवन्दे । गृध्रोऽवदत् कस्त्वम् । सोऽवदत् मार्जारोऽहम् । गृध्रो ब्रूते दूरमपसर । नो चेद्धन्तव्योऽसि । मार्जारोऽवदत् । श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं हंतव्यः । यतः ।

जातिमात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ १ ॥

गृध्रो ब्रूते ब्रूहि किमर्थमागतोऽसि । सोऽवदत् । अहमत्र गंगा
तीरे नित्यस्नायी ब्रह्मचारी चांद्रायणव्रतमाचरंस्तिष्ठामि । यूयं
धर्मज्ञानरता विश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे
प्रस्तुवंति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः
भवंतश्चैतादृशा धर्मज्ञा यन्मामतिथिं हंतुमुद्यताः । गृध्रोऽवदत्
मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसंति । तेनाहमेवं
ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते
च । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चांद्रायणमध्य
वसितम् । परस्परं विवदमानानामपि धर्मशास्त्राणां अहिंसा
परमो धर्मः इत्यत्रैकमत्यम् । इत्येवं विश्वास्य स मार्जारस्तरु
कोटरे स्थितः ।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं
खादति । येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो
जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः
पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे
शावकास्थीनि प्राप्तानि । अनंतरं त ऊचुः । अनेनैव जरद्गवेनास्माकं
शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः ।
अतोऽहं ब्रवीमि ।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ २ ॥

Hitopadesa I.

III

An account of M'alavika'.

राजा । (चेट्यौ प्रति) के भवत्यौ का चेयम् ।
प्रथमा । देव इयमावयोर्भर्तृदारिका ।
राजा । कथमिव ।

उभे । शृणोतु भर्ता । योऽसौ भर्ता विजयदंडेविदर्भनाथं वशी-कृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम तस्येयं कनीयसी भगिनी मालविका नाम ।

देवी । अहो राजदारिकेयम् । चंदनं खलु मया पादुकापरि-भोगेन दूषितम् ।

राजा । कथमत्रभवती कथमियमित्थंभूता ।

मालविका । (निःश्वस्यात्मगतम्) विधिनियोगेन ।

द्वितीया । भर्ता शृणोतु दायादवशं गते माधवसेने तस्यामात्येनार्यसुमतिनास्मादृशं परिजनमुज्झित्वा गूढमपनीतैषा ।

राजा । श्रुतपूर्वं मयैतत् । ततस्ततः ।

उभे । अतःपरं न जानीवः ।

परिव्राजिका । अतःपरमहं मंदभागिनी कथयिष्यामि । माधव सेनामात्यं सुमतिं ममाग्रजमवगच्छ । स इमां तदावस्थागतां मया सार्धमपवाहयन् भवत्संबन्धापेक्षया विदिशागामिन-मनुप्राविशत् । स चाटव्यां निविष्टो गतश्रमो वणिग्जनोऽध्वानमार्गं प्रस्थितुम् । ततश्च ।

तूणीरपट्टपरिणद्धभुजान्तरालमापार्ष्णिलम्बिशिखिपिच्छकला-पधारि । कोदण्डपाणि विनदत्प्रतिरोधकानामापातदुष्प्रसहमाविर-भूदनीकम् ॥ १ ॥

ततो मुहूर्तं बद्धयुद्धास्ते तस्करमुखीकृतास्तद्वीराः सार्थवाहयो-द्धारः । ततः स मम सोदर्यः

इमां परिप्सुर्दुर्जाते पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ १२ ॥

राजा । एवमुपरते सति तस्मिन्ततः । देवि अनया तपस्विन्याः कृते सत्यं दुःखितः ।

परिव्राजिका । ततोऽहं मोहमुपगता यावत्प्रत्यागतसंज्ञा तावदियं दुर्लभदर्शना संवृत्ता । ततो अन्ततः पतितमवलोक्य भ्रातरं पुनर्भोगम-

वैधव्यदुःखया मया त्वदीयं देशमवतीर्येमे काषाये गृहीते। इयमप्याटविकेभ्यो वीरसेनं वीरसेनाद्देवीं गताः देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टा। इत्येतदवसानं कथायाः।

धारिणी। भगवति त्वयाभिजनवतीं मालविकामनाचक्षाणयासांप्रतं कृतम्।

परिव्राजिका। शांतं पापं शांतं पापम्। कारणेन खलु मया नैष्ठुर्यमवलंबितम्। इयं पितरि जीवति केनापि सिद्धादेशेन साधुना मत्समक्षमादिष्टा संवत्सरमात्रं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यतीति। तमवश्यंभाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमंतमवेक्ष्य कालप्रतीक्षया मया तत्साधु कृतमिति पश्यामि।

Mâlavikâgnimitra V.

IV.

Parvati practising penance.

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिंद रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
इयेष सा कर्तुमवंध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥
निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा निवारयंती महतो मुनिव्रतात् ॥ ३ ॥
मनीषिताः संति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियंतुमुद्यमात्।
[illegible] ॥ ५ ॥
[illegible]
[illegible]

यथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखंडिमत् ॥ ७
विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचंदनम् ।
बबंध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥
यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पंकजं सशैवलासंगमपि प्रकाशते ॥ ९ ॥
विसृष्टरागादधरान्निवर्तितः स्तनांगरागारुणिताच्च कंदुकात् ।
कुशांकुरादानपरिक्षतांगुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥ १० ॥
महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थंडिल एव केवले ॥ ११ ॥
पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणांगनासु च ॥ १२ ॥
अतंद्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥ १३ ॥
अरण्यबीजांजलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥ १४ ॥
कृताभिषेकां हुतजातवेदसं त्वगुत्तरासंगवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १५ ॥
विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यंतरसंभृतानलं तपोवनं तच्च बभूव पावनम् ॥ १६ ॥
यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त कांक्षितम् ।
तदाऽनपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥ १७ ॥
क्लमं ययौ कंदुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः कांचनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥ १८ ॥
शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥ १९ ॥
तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
[illegible] केवलमस्य दीर्घयो शनैः शनैः श्यामिकया कृतं पदम् ॥

[illegible]
[illegible] ॥ १ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ २ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ५ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६ ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] सोऽन्यपि [illegible] कनीयसि पूरुः [illegible] जगामाह च । ते चापि पितः [illegible] । [illegible] [illegible] । अनेनाहं [illegible] च [illegible] [illegible] च [illegible] । [illegible] प्रत्याख्यातस्तेनापि शशाप । अथ शर्मिष्ठातनयं पूरुं तथैवाह । स [illegible] पितरं [illegible] महाप्रसादोऽयमस्माक- मित्यभिधाय जरां प्रतिजग्राह स्वकीयं च यौवनं पित्रे ददौ । सोऽपि च तद्यौवनमासाद्य धर्माविरोधेन यथाकाल- मोपपन्नं यथोत्साहं विषयं चचार । सम्यक् प्रजापालनमकरोत् । विश्वाच्या सहोपभोगी भुक्त्वा कामानामन्तमवाप्स्यामीत्यनुदिनं तन्मनस्को बभूव । अनुदिनं चोपभोगतः कामानतीव रम्यान्मेने । ययातिरगायत् ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ २ ॥

यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
समदृष्टेस्तदा पुंसः सर्वा एव सुखा दिशः ॥ ३ ॥

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
तां तृष्णां संत्यजन्प्राज्ञः सुखेनैवाभिपूर्यते ॥ ४ ॥

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यतः ॥ ५ ॥

पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥ ६ ॥

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ ७ ॥

पूरोः सकाशादादाय जरां दत्त्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम् ॥ ८ ॥

Vishnu Purana.

VIII.

Introduction of Patralekha to Chandrapida.

अन्येद्युश्च स प्रभातसमय एव सर्वान्तःपुराधिकृतमवनिपतेः परमसंमतं कैलासनामानं कंचुकिनमायान्तमपश्यत्। स कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरो विज्ञापयामास। कुमार महादेवी विलासवती समाज्ञापयति। इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बंदीजनेन सहानीयान्तःपुरपरिचारिकामध्यमुपनीता। सा मया विगतनाथा राजदुहितेति च समुपजातस्नेहया दुहितृनिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च। तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषिता। न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यम्। बालेव लालनीया। स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया। शिष्येव द्रष्टव्या। सुहृदिव सर्वविश्रम्भेष्वभ्यन्तरीकरणीया। दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे बलवानस्यां पक्षपातः। महाभिजनराजवंशप्रसूता चार्हतीयमेवंविधानि कर्माणि। नियतं स्वयमेवेयमभिविनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति। केवलमतिचिरकालोपचिता बलवती मे प्रेमवृत्तिरस्यामविदितशीलश्चास्याः कुमार इति संदिश्यते। सर्वथा तथा कल्याणिना प्रयतितव्यं यथैव मतिचिरमुचिता परिचारिका ते भवतीति। इत्यभिधाय विरतवचसि कैलासे कृताभिज्ञातप्रणामां पत्रलेखामनिमिषलोचनं सुचिरमालोक्य चंद्रपीडो यथाज्ञापयत्यम्बेत्येवमुक्त्वा कंचुकिनं प्रेषयामास।

पत्रलेखा तु ततः प्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच। चंद्रपीडस्यापि तस्यां

विषयानहं संभुञ्जानो [illegible] प्रत्याख्याते [illegible]
स नैच्छत् जरामादातुम् । तं चापि शशाप । त्वत्प्रसूतिर्न
राज्यार्हा भविष्यतीति । अनन्तरं तुर्वसुं द्रुह्युमनुं च पृथिवीपति-
र्जरायौवनप्रदानाय च प्रार्थयामास । तैरप्येकैकेन
प्रत्याख्यातस्तांश्च शशाप । अथ शर्मिष्ठातनयं पूरुं तथैवाह । स
चातिप्रवणमतिः सबहुमानं पितरं प्रणम्याह महाप्रसादोऽयमस्माक-
मित्यभिधाय जरां जग्राह स्वकीयं च यौवनं पित्रे ददौ ।
सोऽपि च तद् यौवनमासाद्य धर्माविरोधेन यथाकामं यथाका-
लोपपन्नं यथोत्साहं विषयं चचार । सम्यक् प्रजापालनमकरोत् ।
विश्वाच्या देवयान्या सहोपभोगं भुक्त्वा कामानामन्तं प्राप्स्यामीत्यनुदिनं
तन्मनस्को बभूव । अनुदिनं चोपभोगतः कामानतिरम्यान्मेने ।
ययातिरपाठ ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ २ ॥

यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ ३ ॥

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
तां तृष्णां संत्यजन्प्राज्ञः सुखेनैवाभिपूर्यते ॥ ४ ॥

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यतः ॥ ५ ॥

पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥ ६ ॥

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ ७ ॥

पूरोः सकाशादादाय जरां दत्त्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम् ॥ ८ ॥

Vishnu Purana.

- वन. । यदि तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते तत्कोऽयमार्याया दीर्घप्रवासः ।

आत्रे. । तत्र महानध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः ।

वन. । कीदृशः ।

आत्रे. । तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुते स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम् ।

वन. । अपि तयोर्नामसंविज्ञानमस्ति ।

आत्रे. । तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः ।

वन. । कीदृशः प्रभावः ।

आत्रे. । तयोः किल सरहस्यजृम्भकास्त्राण्याजन्मसिद्धानीति ।

वन. । अहो नु भोः । चित्रमेतत् ।

आत्रे. । तौ च भगवता वाल्मीकिना धात्रीकर्मवस्तुतः परिगृह्य पोषितौ परिरक्षितौ च । वृत्तचूडौ त्रयीवर्जमितरा विद्याः सावधानेन परिपाठितौ । समनंतरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ । न ह्येताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति । यतः

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥ ४ ॥

वन. । अयमसावध्ययनप्रत्यूहः ।

आत्रे. । अपरश्च ।

वन. । अथापरः कः ।

आत्रे. । अथ स ब्रह्मर्षिरेकदा मध्यंदिनसमये नदीं तमसामनुप्रपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श ।

दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत् । अभ्यधिकं च प्रतिदिवसमस्याः प्रसादमकरोत् । आत्महृदयादप्यतिरिक्तामिव चैनां सर्वविश्रंभेष्वमन्यत ।

Kadambari.

IX.

Atreyi and Vasanti (a Sylvan deity.)

(नेपथ्ये । स्वागतं तपोधनायाः) ।

(प्रविश्य) अध्वगवेषा तापसी । अये वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते ।

(प्रविश्य) । वनदेवता । (अर्घ्यं विकीर्य)

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः संगः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

ताप. । किमत्रोच्यते ।

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(इत्युपविशतः) ।

वन. । कां पुनरत्रभवतीमवगच्छामि ।

ताप. । आत्रेय्यस्मि ।

वन. । आत्रेयि । कुतः पुनरिहागम्यते किं प्रयोजनं वा दण्ड-रण्यप्रवेशो ।

आत्रे. । अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसंति तेभ्योऽधिगंतुं निगमांतविद्यां वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३

आकस्मिकप्रत्ययमात्रां च देवीं वाचमनुष्टुप्छन्दसा परिणताम-भ्युदैरयत्।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौंचमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥ इति

वन.। चित्रमाम्नायादन्योऽयं नूतनश्छंदसामवतारः।

आत्रे। तेन खलु पुनः समयेन तं भगवंतमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंगम्य भगवान्भूतभावनः पद्मयोनिरवोचत्। ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तद् ब्रूहि रामचरितम्। अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु। आद्यः कविरसीत्युक्त्वांतर्हितः। अथ भगवान्प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।

वन.। हंत तर्हि पंडितः संसारः।

आत्रे। तस्मादेवोक्तं तत्र महानध्ययनप्रत्यूह इति।

वन.। युज्यते।

आत्रे.। विश्रांतास्मि भद्रे संप्रत्यगस्त्याश्रमस्य पंथानं ब्रूहि।

वन.। इत पंचवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण।

आत्रे.। (सबाष्पा) अप्येतत्तपोवनम्। अप्येषा पंचवटी। अपि सरिदियं गोदावरी। अप्ययं गिरिः प्रस्रवणः। अपि वनदेवता जनस्थानवासिनी वासंती त्वम्।

वासं। अस्त्येतत्सर्वम्।

आत्रे.। वत्से जानकि।

स एष ते वल्लभबंधुवर्गः प्रासंगिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः करोति ॥६॥

वासं. (सभयं स्वगतं) कथं नामशेषामित्याह। (प्रकाशम्।) आर्ये किमत्याहितं सीतादेव्याः।

आत्रे.। न केवलमत्याहितं सापवादमपि।

वासं.। कथमिव।

आत्रे.। (कर्णे)। एवमेवम्।

वासं. । (सखेदकौतुकाश्चर्यं) कुमारलक्ष्मणस्यापि पुत्रः ! मातर्जीवामि ।

आत्रे. । अत्रांतरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितम् । ततो न राजापचारमंतरेण प्रजानामकालमृत्युश्चरतीति आत्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत् ।

> शंबूको नाम वृषलः पृथिव्यां तप्यते तपः ।
> शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम् ॥ ८ ॥

इति उपश्रुत्य कृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः संचरितुमारब्धवान् ।

वासं. । शंबूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति । तदपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात् ।

आत्रे. । भद्रे गम्यतेऽधुना ।

वासं. । एवमस्तु । कठोरीभूतोऽयं दिवसः । तथा हि

> कंडूलद्विपगंडपिंडकषणोत्कंपेन संपातिभि-
> र्घर्मस्रंसितबंधनैः स्वकुसुमैरर्चंति गोदावरीम् ।
> छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
> कूजत्क्लांतकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ९ ॥

Uttararamacharita II.

X

The Yaksha's abode.

> तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
> दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
> यस्योपांते कृतकतनयः कांतया वर्धितो मे
> हस्तप्राप्यस्तबकनमितो बालमंदारवृक्षः ॥ १ ॥

रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः ॥ ७ ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ ८ ॥
सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनुषि चातता ॥ ९ ॥
तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च।
फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव ॥ १० ॥
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ ११ ॥
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव ॥ १२ ॥
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ १३ ॥
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ १४ ॥
स्थित्यै दंडयतो दंड्यान्परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ १५ ॥
दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ १६ ॥
न किलानुययुस्तस्य राजानो रक्षितुर्यशः।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ १७ ॥
द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदंगुलीवोरगक्षता ॥ १८ ॥
तं वेधा विदधे नूनं महाभूतसमाधिना।
तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ १९ ॥
स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ २० ॥

तां च प्ररुदितां दृष्ट्वा चन्द्रापीडस्तत्क्षणमचिन्तयत् । अहो दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वन्ति । सर्वथा न कंचन न स्पृशन्ति शरीरधर्माणमुपतापाः । बलवती हि द्वंद्वानां प्रवृत्तिः । इदमपरमधिकतरमुपजनितमतिमहन्मनसि मे कौतुकमस्या बाष्पसलिलपातेन । न ह्यल्पीयसा शोककारणेन धीराः क्रियंते एवंविधा मूर्तयः । न हि क्षुद्रनिर्घातपाताभिहता चलति वसुधा इति संवर्धितकुतूहलश्च शोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादंजलिना मुखप्रक्षालनोदकमुपनिन्ये । सा तु प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च निःश्वस्य शनैः प्रत्यवादीत् । राजपुत्र किमनेनातिनिर्घृणहृदयाया मम मंदभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तांतेनाश्रवणीयेन श्रुतेन । तथापि यदि महत्कुतूहलं तत्कथयामि श्रूयताम् ।

Kadambari.

XIV.

A contrast.

अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेशामदृष्टपूर्वां वनितामपश्यत् ॥ १ ॥
सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः ।
तुः परेषां जयशब्दपूर्वं तस्यांजलिं बंधुमतो बबंध ॥ २ ॥
[illegible]
[illegible]
[illegible] ३ ॥
[illegible] यथाप्रभावो न च लक्ष्यते ते ।
मर्पि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ॥ ४ ॥

अश्वत्थामा । हा तात हा सुतवत्सल हा वृथा म
जीवित हा शौर्यराशे हा युधिष्ठिरपक्षपातिन् । (हा

सूतः । कुमार अलमत्यंतपरिदेवनकार्पण्येन ।

अश्वत्थामा:—। (आकाशे)। युधिष्ठिर युधिष्ठिर ।

आजन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः ।
ताते गुरौ द्विजवरे मम भाग्यदोषा-
त्सर्वं तदेकपद एव कथं निरस्तम् ॥ ५ ॥

(ततः प्रविशति सोद्वेगः कृपः)।

सूतः । कुमार एष ते मातुलः शारद्वतः पार्श्वे तिष्ठति ।

अश्वत्थामा । (विलोक्य सबाष्पम्) मातुल ।
क नु खलु स ते स्वसुः श्लाघ्यो भर्ता गतः ।

कृपः । वत्स परिगतपरिगंतव्य एव भवान् । अलमत्यंत
शोकावेगेन ।

अश्वत्थामा । मातुल परित्यक्तमेव मया परिदेवनम् । एषोऽहं
सुतवत्सलं तातमेवानुगच्छामि ।

कृपः । वत्स अनुपपन्नमिदं भवद्विधानाम् ।

अश्वत्थामा । आर्य सत्यमेवैतम् । किं त्वतिदुर्वहत्वाच्छोकभा
न शक्नोमि तातविरहितः क्षणमपि प्राणान्धारयितुम् । तद्गच्छ
तमेवोद्देशं यत्र तादृशमपि पितरं द्रक्ष्यामि ।

नेपथ्ये । आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोकात्
द्रोणस्याजौ नयनसलिलक्षालितार्द्राननस्य ।
मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंसं
धृष्टद्युम्नः स्वशिबिरमयं याति सर्वे सहध्वम् ॥ ६ ॥

अश्वत्थामा । (सक्रोधं सकंपं च कृपसूतौ दृष्ट्वा)। किं नामेदम् ।
सप्दसमाप्तधनुषा मनुजेश्वराणां
मायेन्द्रवेदसहसान्वतमाश्रितस्य ।

तातस्य मे पलितमौलिनिरस्तकाशे
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥ ७ ॥

सूतः । एवम् एवं किल जनः कथयति ।

अश्वत्थामा । किं तातस्य दुरात्मना परिमृष्टमभूच्छिरः ।

सूतः । (सभयम्) कुमार आसीदयं तस्य तेजोराशेरनयः परिभवावतारः ।

अश्वत्थामा । हा तात हा पुत्रप्रिय मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणात्मा परिभावितः । अथवा

परित्यक्ते देहे रणशिरसि शोकान्धमनसा
शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत् ।
स्फुरद्दिव्यास्त्रौघद्रविणमदमत्तस्य च रिपो-
र्ममैवायं पादः शिरसि निहितस्तस्य न करः ॥ ८ ॥

आ दुरात्मन् पाञ्चालापसद

तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य
त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे ।
अश्वत्थामा करधृतधनुः पाण्डुपाञ्चालसेना-
तूलोत्क्षेपप्रलयपवनः किं न यातः स्मृतिं ते ॥ ९ ॥

अहो युधिष्ठिर युधिष्ठिर । अजातशत्रो अमिथ्यावादिन् धर्मपुत्र सानुजस्य ते किमनेनापकृतम् । अथवा किमनेनाद्रोहनिमित्तेन तेन । अर्जुन सात्यके वृकोदर माधव युक्तं नाम भवतां गुरुम् अनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाच विशेषतो मम पितुरमुना द्रुपदकुलकलङ्केन मनुजपशुना स्पृश्यमानमुपेक्षितुम् । अथवा सर्वे एवैते पातकिनः । किम-

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि

कृपः। वत्स किं न संभाव्यते मातुलानुगुणे बाहुशालिनि द्विजात्यग्रामणोऽपि हि भवति।

अश्वत्थामा। सूत गच्छ। सर्वोपकरणैः सांग्रामिकैः सज्जं धनुःपेतमस्मत्स्यंदनमुपनय।

सूतः। यदाज्ञापयति कुमारः। [इति निष्क्रान्तः]

कृपः। वत्स भवत्प्रतिकर्तव्योऽभिमन्दाक्षणे परिभवाग्नौ सर्वेषामस्माकं कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम्।

अश्वत्थामा। किमतः परम्।

कृपः। सेनापत्येऽभिषिक्तं भवन्तमिच्छामि समरभुवमवतारयितुम्।

अश्वत्थामा। मातुल परतंत्रमिदमकिंचित्करं च।

कृपः। वत्स न खलु परतंत्रं नाकिंचित्करं च। पश्य।

भवेदभीष्ममद्रोणं धृतराष्ट्रबलं कथम्।
यदि तत्तुल्यकर्माणि भवान्धुर्यो न युज्यते ॥ ११ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपंथीभवितुं किं पुनर्युधिष्ठिरबलम्। तदहं मन्ये। परिकल्पिताभिषेकोपकरणः कौरवराजो न चिरात्त्वामेवाभ्युदीक्षमाणस्तिष्ठतीति।

अश्वत्थामा। यद्येवं त्वरते मे परिभवानलदह्यमानमिदं चेतस्तत्प्रतीकारजलावगाहनाय। तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सेनापत्यस्वयंग्रहणप्रणयसमाश्वासनया मंदसंतापं करोमि।

कृपः। वत्स युक्तमिदम्। अतस्तमेवोद्देशं गच्छावः।

(इति परिक्रामतः)।

Venisamhara II

दुर्यो.। (दृष्ट्वा) अये कथं कृपोऽश्वत्थामा च।

(आसनादवतीर्य)। गुरो अभिवादये (अश्वत्थामानं प्रति)। आचार्यपुत्र एहि परिष्वजस्व माम्।

(आलिङ्ग्य पार्श्वे उपवेशयति। अश्वत्थामानं बाष्पमुन्मृजति)।

कर्णः। द्रौणायने अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम्।

दुर्यो.। आचार्यपुत्र को विशेष आवयोरस्मिन्व्यसनार्णवे। पश्य

तातस्तव प्रणयवान्स पितुः सखा मे
शस्त्रे यथा तव गुरुः स तथा ममापि।
किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरु शुचा मनसा त्वमेव ॥ ३ ॥

अश्व। राजन्नेवं पक्षपातिनि त्वयि युक्तमेव शोकभारो लघूकर्तुम्। किं तु

मयि जीवति मत्तातः केशग्रहमवाप्तवान्।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥ ४ ॥

कर्णः। द्रौणायने किमत्र क्रियते यदा तेनैव सर्वपरिभवास्पदहेतुना शस्त्रमुत्सृजतेदृशीमवस्थामात्मा नीतः।

अश्व.। अङ्गराज किमाह भवान्। किमत्र क्रियत इति श्रूयतां यत्क्रियते।

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥ ५ ॥

दुर्यो.। आचार्यपुत्र तस्य तथाविधस्यानन्यसाधारणस्य ते वीरमानस्य किमन्यत्सदृशम्।

कृपः। राजन्सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारमस्य। अथवा कृतपरिकरोपसृष्टेन लोकत्रयमपि दुष्प्रधर्षतरत्वम्। अतोऽभिषिच्यतां सैनापत्ये।

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्
यथा पांचालभीतेन पित्रा ते बाहुशालिना ॥ ९ ॥

अश्व. (सक्रोधम्)। अरे रथकारकुलकलंक राधागर्भभार(भूत)
आयुधानामपि नाममप्यधिक्षिपसि। अथवा

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा।
परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो क्व नु तदा ॥ १० ॥

कर्णः (विहस्य)। एवं भीरुरहम्। त्वं पुनर्धिक्मैकरसः पितरमनुस्मृत्य महान्मे संशयो जातः। अपि च रे मूढ

यदि शस्त्रमुज्झितमशस्त्रपाणयो न निवारयंति किमरीनुदा-
युधात्। यदनेन मौलिदलनेऽप्युदासितं सुचिरं स्थितेव नृपचक्र-
संनिधौ ॥ ११ ॥

अश्व. (सक्रोधं सकंपं च)। दुरात्मन् राजवल्लभप्रगल्भ सू-
तापसद असंबद्धप्रलापिन्

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य।
तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ॥ १२ ॥

(इति तथा कर्तुमुत्तिष्ठति)

कृपदुर्योधनौ। गुरुपुत्र मर्षय मर्षय। (इति वारयतः)।

(अश्वत्थामा चरणप्रहारं नाटयति)।

कर्णः (सक्रोधमुत्थाय खड्गमाकृष्य) अरे दुरात्मन् ब्रह्मबंधो आत्मश्लाघिन्

जात्या काममवध्योऽसि चरणं त्विदमुद्धृतम्।
अनेन लूनं खड्गेन पतितं वेत्स्यसि क्षितौ ॥ १३ ॥

अश्व.। अरे मूढ जात्या चेदवध्योऽहमियं सा जातिः परित्यक्ता।

(इति यज्ञोपवीतं छिनत्ति)

XVII.

Aja's lamentation on the death of his

विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ १ ॥
कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥ २ ॥
अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः।
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ ३ ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ४ ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥ ५ ॥
कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥ ६ ॥
मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम्।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ॥ ७ ॥
कुसुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान्।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥ ८ ॥
तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥ ९ ॥
इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम्।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम् ॥ १० ॥
शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम्।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥ ११ ॥
नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम्।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥ १२ ॥
कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम्।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ॥ १३ ॥

XVIII.

Advice of Sukanâsa to Chandrâpîda.

तात चंद्रापीड विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवमित्यतो विस्तरेणाभिधीयसे। गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा। सर्वाविनयानामेकैकमप्येषामायतनं किमुत समवायः। यौवनारंभे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। इंद्रियहरिणहारिणी च सततमतिदुरंतेयमुपभोगमृगतृष्णिका। तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतंति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासंगो विषयेषु। भवादृशा एव भवंति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशंति सुखमुपदेशगुणाः। अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमजलं स्नानं। मोहगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरल हि तेषामुपदेष्टारः। अलीकाभिमानोन्मादकारिणि धनानि राज्यविषविकारतन्द्राप्रदा राज्यलक्ष्मीः।

आलोकयतु तावल्लक्ष्मीमेव भवान्प्रथमम्। इयमनार्या लब्धापि दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न वैदग्ध्यं गणयति। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। न क्वचिन्निर्भरमाबध्नाति पदम्। यथा यथेयं दीप्यते तथा तथ कज्जलमलिनमेव कर्म केवलमुद्वमति। न हि तं पश्यामि यं ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रलब्धः। एवं विषमापि कामया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवंति राजानः सर्वाविनयाधिष्ठानतां च गच्छंति। तेष

ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो हि राजा त्रैलोक्य-
दर्शीव सिद्धादेशी भवति । इत्येतावदभिधायोपशशाम ।

Kadambari.

XIX

The evils of anarchy.

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात् ॥ १ ॥
नाराजके जनपदे विद्युन्माली महास्वनः ।
अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ॥ २ ॥
नाराजके जनपदे बीजमुष्टिः प्रकीर्यते ।
नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ॥ ३ ॥
अराजके धनं नास्ति नास्ति भार्याप्यराजके ।
इदमत्याहितं चान्यत्कुतः सत्यमराजके ॥ ४ ॥
नाराजके जनपदे कारयन्ति सभां नराः ।
उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च ॥ ५ ॥
नाराजके जनपदे यज्ञशीला द्विजातयः ।
सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः ॥ ६ ॥
नाराजके जनपदे महायज्ञेषु यज्वनः ।
ब्राह्मणा वसुसंपूर्णा विसृजन्त्याप्तदक्षिणाः ॥ ७ ॥
नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ ८ ॥
नाराजके जनपदे [illegible]
[illegible] ॥ ९ ॥
नाराजके जनपदे वणिजो दूरगामिनः ।
गच्छन्ति क्षेममध्वानं बहुपण्यसमाचिताः ॥ १० ॥

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ३० ॥
मानेन रक्ष्यते धान्यमश्वान् रक्षत्यनुक्रमः ।
अभीक्ष्णदर्शनं गावः स्त्रियो रक्ष्याः कुचेलतः ॥ ३१ ॥

Mahâbhârata

XXI.

Vidura's advice to Dhritarashtra.

Part II.

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ १ ॥
य ईर्षुः परवित्तेषु रूपे वीर्ये कुलान्वये ।
सुखसौभाग्यसत्कारे तस्य व्याधिरनन्तकः ॥ २ ॥
अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ३ ॥
विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
मदा एतेऽवलिप्तानामेत एव सतां दमाः ॥ ४ ॥
गतिरात्मवतां सन्तः सन्त एव सतां गतिः ।
असतां च गतिः सन्तो न त्वसन्तः सतां गतिः ॥ ५ ॥
जिता सभा वस्त्रवता मिष्टाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ६ ॥
शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥ ७ ॥
आढ्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।
तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ८ ॥

संपन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ९ ॥
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
जीर्यन्त्यपि हि काष्ठानि दरिद्राणां महीपते ॥ १० ॥
अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु मर्त्यानामवमानात्परं भयम् ॥ ११ ॥
ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः ।
ऐश्वर्यमदमत्तो हि नापतित्वा विबुध्यते ॥ १२ ॥
इन्द्रियैरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ १३ ॥
यो जितः पञ्चवर्गेण सहजेनात्मकर्शिना ।
आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराट् ॥ १४ ॥
अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वाजितामात्यः सोऽवशः परिहीयते ॥ १५ ॥
वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ १६ ॥
रथः शरीरं पुरुषस्य राजन्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशली सदश्वैर्दान्तैः सुखं याति रथीव धीरः ॥ १७ ॥
एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।
अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥ १८ ॥
धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ १९ ॥
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ २० ॥
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्मा ह्येवात्मनो बंधुरात्मैव रिपुरात्मनः ॥ २१ ॥
बंधुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
स एव नियतो बंधुः स एव नियतो रिपुः ॥ २२ ॥

यः पञ्चाभ्यन्तरान् शत्रूनविजित्य मनोमयान् ।
जिगीषति रिपूनन्यान् रिपवोऽभिभवन्ति तम् ॥ २३ ॥
असंत्यागात्पापकृतामपापांस्तुल्यो दण्डः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावात्तस्मात्पापैः सह संधिं न कुर्यात् ॥ २४ ॥
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ २५ ॥
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ २६ ॥
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ २७ ॥
अभ्यावहति कल्याणं विविधं वाक् सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ २८ ॥
संरोहति शरैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ २९ ॥
वाक्सायका वदनान्निष्पतन्ति यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति तान्पण्डितो नावसृजेत्परेषु ॥ ३० ॥
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥ ३१ ॥
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ३२ ॥

Mahâbhârata.

XXII.

The tale of Purûravas and Urvasî.

Part I.

पुरा किल सोमकुलावतंसः पुरूरवा नाम राजा बभूव । [illegible]
[illegible]

यः पंचाभ्यंतरान् शत्रूनविजित्य मनोमयान् ।
जिगीषति रिपूनन्यान् रिपवोऽभिभवंति तम् ॥ २३ ॥
असंत्यागात्पापकृतामपापांस्तुल्यो दंडः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावात्तस्मात्पापैः सह संधिं न कुर्यात् ॥ २४ ॥
आक्रोशपरिवादाभ्यां विहिंसंत्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ २५ ॥
हिंसा बलमसाधूनां राज्ञां दंडविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ २६ ॥
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ २७ ॥
अभ्यावहति कल्याणं विविधं वाक् सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ २८ ॥
संरोहति शरैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ २९ ॥
वाक्सायका वदनान्निष्पतंति यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेभ्यः ॥ ३० ॥
यस्मै देवाः प्रयच्छंति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षंति सोऽवाचीनानि पश्यति ॥ ३१ ॥
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ३२ ॥

Mahâbhârata.

XXII

The tale of Pururavas and Urvasi

Part I.

पुरा किल सोमकुलोत्पन्नः पुरूरवा नाम राजा बभूव । स
[illegible]

सह संलापं शृण्वत्यौ तस्थतुः। माणवको राजानमाह। भो वयस्य चिन्तितो मयोपायः। स्वप्नसमागमकारिणीं निद्रां सेवतां भवान् अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिमालिख्यावलोकयंस्तिष्ठ। राजा आह। सखे उभयमप्यनुपपन्नम्। मम हृदयं कामस्येषुभिः क्षतं व्यथतः स्वप्नसमागमकारिणीं निद्रां कथमुपलभे। अपरं च यदि तस्याः प्रतिकृतिमालिखामि नहि आलेख्येऽसमाप्त एव मम नयने उद्बाष्पे भवतः। अतो या मम मानसीं रुजं न वेत्ति विदित्वा वा मामवमन्यते तस्यामुर्वश्यां मम समागममनोरथमलब्धफलमीदृशं विधाय पंचबाणः सर्वथा कृती भवतु। उर्वशी तद्वचनं श्रुत्वा स्वामिन्यदि मामहमनुरक्तस्य तवोपरि यथा त्वया संभाविता तथा परमार्थतः स्यां तर्हि किमिति मंदनयनशाला अपि ललितपारिजातशयनीये मम शरीरकेऽसुष्णा भवेयुरिति तस्यागतानुरागपिशुनं काव्यं प्रभावनिर्मिते भूर्जपत्रे लिखित्वा ततः पुरतस्तत्पत्रं न्यक्षिपत्। राजापि तद्गृहीत्वा वाचयित्वा च संजातानंदः धार्यतामयं प्रियायाः स्वहस्त इत्युक्त्वा माणवकस्य हस्ते तत्पत्रं ददौ। अथानंतरं तयोर्मद्भीप्रेतिया चित्र-लेखा स्वदर्शनसमुत्सुकेन मदनेन बलवदाप्यमानाहं भूयोऽपि महाराजेनानुकंपनीया इति प्रियसख्या विज्ञप्तिं राज्ञे निवेदयामास। सोऽपि तदधिकतरं मदनेन पीड्यमानस्तां विज्ञप्तिं परमानन्दा-दिनानुमेने। यावदुर्वशी राजानं प्रणयेनोपविशति तावदेव चित्र-लेखे त्वरयोर्वशीं यतो भरतेन मुनिना भवतीषु यः प्रयोगो नियुक्तस्तमद्य सलोकपालो मरुतां भर्ता द्रष्टुमना इति देवदूताह्वाने ते अप्सरसौ राजानुज्ञया च स्वर्गमगच्छताम्। गतायां तस्यां राजा चक्षुर्भ्यामिव संप्रति वञ्चित इति संप्रधार्य तद्भूर्जपत्राव-लोकनेन दृष्टिं विलोभयितुकामो माणवकमाह। उपनय भूर्जपत्र-मिति। किं तु माणवकस्य प्रमादेन तत्पत्रं तस्य हस्ताद्भ्रष्टं भर्तारं द्रष्टुमायातया देव्या औशीनर्या समासादितं तद्वृत्तान्तं च परिज्ञाय तेर्ष्यया तया इतस्ततस्तदन्वेषणपरस्य तस्य पुरतः

आगमनप्रयोजनं च पृष्टोऽकथयत् । वयस्य केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गंधर्वसेना सम- दिष्टा । ततो वयमंतरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त- मिहस्थमुपागताः । स भवानिमां पुरस्कृत्य सहास्माभिर्मघ- द्रष्टुमर्हसि । महत्खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवता राजा प्रत्युवाच । मा मैवम् । ननु वज्रिण एव वीर्यमेतद्यदस्य पक्ष्या द्विषतो विजयंते । वसुधाधरकंदराभिसर्पी हरेः प्रति- रवोऽपि नागान् भिनत्ति । तथापि नायमवसरो मम शतक्रतुं द्रष्टुं त्वमेवात्रभवतीं प्रभोरंतिकं प्रापय । तथेत्युक्त्वा चित्ररथः स सर्वाभिरप्सरोभिः प्रस्थितः । उर्वशी तु राजर्षिमामंत्रयितुमशक्नु- वती चित्रलेखामुखेन महाराजेनाभ्यनुज्ञाता इच्छामि प्रियसखी- मिव महाराजस्य कीर्तिं महेन्द्रलोकं नेतुमिति राजानं विज्ञापया- मास । तेनानुज्ञाता च लताविटप एकावली लग्ना इति सव्याजं तां मोचयितुं सखीमभ्यर्थ्य राजानमेवावलोकयंती सनिःश्वासं निःक्रांता ।

राजा तु तां सरोसुंदरीं गतामवलोक्य मदनशरपीडितस्तस्याः कृते भृशमुत्कंठितोऽभूत् । तां तस्यावस्थां दृष्ट्वा तस्य देवी काशीराजपुत्री औशीनरी नाम तस्य शून्यहृदयत्वस्य कारणं राज्ञः प्रियवयस्यान्माणवकाद्विज्ञातुं निपुणिकां नाम स्वचेटीमाज्ञापया- मास । यथार्थनाम्नी सा निपुणिकाऽतिविश्रब्धतया भर्तृरहस्यमुपलभ्य दर्शं कृतवती । ततो राजा रहस्यनिक्षेपस्थानविश्वस्ते माणवकेन समा- श्वासितः उर्वशीगतामेव कथां कुर्वन्वयस्येन सहोद्यानविनोदार्थं प्रमदवनं प्रविवेश । किं तु वसंतावतारसूचकं तदभिरामत्वमव- लोक्य संतापापनयोन्मुखः कुत्रापि धृतिं न लेभे । तस्मादुप- स्यमाह । कोऽप्युपायस्तावत् चिंत्यतां येन सफलप्रार्थनो भवेयम् । वयस्यमाणवकः समाधिमाश्रयोपायं चिंतयामि तावदाचारायणेन चिरकंठस्यार्णाहर्नंधी प्रतिहतस्य शिशिरमयभूतं राजर्षिमुप- शुश्रूषमाणा । न हुवे तत्रवास्तव्यप्रतिष्टस्थे भूत्वा राजो वयस्येन

दासनियमवेषा राजमहिषी दृश्यते तथैव चिरमिह स्थास्य-तीति चित्रलेखया समाश्वासिता सर्वथ तिरस्करिणीप्रतिच्छन्ना-स्थितम् । एवमवस्थितयां तस्यां देवी अवधूतार्यपुत्रप्रणिपाता पश्चात्संतप्यमानसापि प्रियानुप्रसादननामव्रतोपदेशेनोपचाराति-क्रमे प्रमार्ष्टुकामा तत्रैवागता । तां दृष्ट्वा राजाऽन्यसंक्रान्तप्रेमाऽधि-कतरमेव देव्यां दाक्षिण्योऽभूत् । देव्यपि व्रतानुरूपं गंधपुष्पादिभि-र्देवं चंद्रपादानभ्यर्च्य पश्चाद्राजानं च पूजयित्वा प्रांजलिः प्रणि-पत्याह । एषाहं देवतामिथुनं रोहिणीमृगलांछनं साक्षीकृत्यार्य-पुत्रमनुप्रसादयामि । अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रसमागमप्रणयिनी तया सह मया प्रीतिबंधेन वर्तितव्या-मिति । एतद्देवीवचनं श्रुत्वा माणवकोऽपवार्याह । छिन्नहस्ते मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यतीति । प्रकाशं च देवीमाह । भवति किं तादृशः प्रियस्तत्रभवान् । देव्याह । मूढ अहं स्वस्यात्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि । एतावता चिंतय तावत्प्रियो न वेति । एवमुक्त्वा निष्क्रांता देवी । उर्वश्यपि महानुभावया देव्या अभ्यनुज्ञाताऽनंत-रं मे प्रियसमागमो भविष्यतीति मन्यमाना राजानं सहसो-पसृत्य जयशब्दमुदीरयामास । तेन चाभिनंदिता तस्यैवासन-मुपाविष्टा । ततस्तु वसंतानंतर उष्णसमये भगवान् सूर्यो मयोपचरितव्यस्तदर्थं मे प्रियसखी स्वर्गस्य भोक्तव्यं तथा त्वया कर्तव्यमिति राजानं विज्ञाप्य चित्रलेखा गता । राजापि तथेति प्रतिपद्य मनःस्थैर्यतया हर्षनिर्भरः कंठितकालं प्रदीपदम-नीयां चंद्रपादान् सेवित्वा वासगृहं प्रविवेश ।

Vikramorvasiyam

एव सहसागमीय प्रस्थितम्। राजा तु तेनैव गृहीतः दुर्जनं इव प्रतिवचने शत्रुमममर्गं आत्मनः सौभाग्यं प्रख्यापयितुं का कथमपि प्रापयत्। देवी तु कुपितां रुष्टाऽपराधी नामाहं यद् इत्येव [इत्थं संरम्भादित्यादिवचनैस्तां प्रणिपातमनुनेतुं प्रवृत्त किं तु तत्प्रणिपातमवधूय आकृतजनदीपायसना सा सपदि निष्क्रान्ता। अनेन समयेन गतमर्धं दिवसस्य तस्मात्स्नानभो चितं राजा सवयस्योऽनन्तरमेव प्राविशत्।

भरतमुनिप्रयोगं द्रष्टुमना महेन्द्रः उर्वशीं ससखीमाह्वाययदि मार्गनिर्दिष्टमेव। तया च तस्य पुरतः सरस्वतीकृतलक्ष्मीस्वयंवरनामके काव्यबन्धेऽभिनीयमाने तेषु तेषु रसेषु परिचरन्त्यभासीत्। किं तु मधितव्यतालुभिधार्यानीन्द्रियाणीति वचनानुरोधाद्धर्वस्य वचनमेकस्मिन् स्थले प्रमादस्खलितमासीत्। यतो लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा सखि समागता एते सकेशवा लोकपालाः कतमस्मिंस्ते भावाभिनिवेश इति। ततस्तया पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी। तां श्रुत्वा भरतः क्रुद्धस्तां शशाप येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यतीति। महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी सा भणिता। यस्मिन् बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणीयम्। अतस्त्वं च स्वयमुपतिष्ठ यावत्स त्वयि दृष्टसंतानो भविष्यतीति। नृपादिष्टानुरोधात्सूर्वशी अस्तमिते सूर्ये पुरूरवसमुपस्थातुकामाऽऽभरणभूषितं नीलांशुकपरिच्छदमभिसारिकावेषं परिधाय ससखी परिवर्तितामिव केनासदिशारं प्रियतमस्य भवनमुपगता। तदा राजा वयस्येन सह स्वामवस्थामेवोद्दिश्य संलापं कुर्वाणस्तया दृष्टः। यदा चाहमेवास्योत्कण्ठाहेतुरिति तस्याः संशयच्छेदो जातस्तदा तमुपगन्तुमियेष। किं तु तत्क्षण एव इतो देवीति वचनं श्रुत्वा परं विषादमगमत्। किंतु-

XXIII.

The tale of Pururavas and Urvaśi

Part II.

अथ समतिक्रान्तेषु केषुचिद्दिवसेषु उर्वशी तं राजर्षिमनु [illegible]
येविशाराज्यपुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता। तत्र च [illegible]
मन्दाकिन्याः पुलिनेषु सिकता सिकतापर्वतकेलीभिः [illegible]
विद्याधरदारिका उदयवती नाम तेन राजर्षिणा निध्यातेति [illegible]
सोर्वशी यतो भूशकुद्धः प्रणयोऽन्वबन्धः। ततो भर्तुरनुनयमप्र[illegible]
पद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं प्र[illegible]
प्रवेशानन्तरमेव च काननोपान्तवर्तिलतारूपेण परिणत[illegible]
रूपम्। अथ स राजर्षिस्तस्मिन्नेव कानने प्रियतमां विचिन्व[illegible]
कालमतिवाहयामास। प्रथमं तावदस्य प्रियया वियोग [illegible]
उपनतः। अपरं च निर्धूतानामम्बुकणानां जलदसमयः संप्रा[illegible]
प्तेन तस्य दुःखं दुःखानुबन्धीव संजातम्। तथा चोन्मत्त [illegible]
तस्मिन्वने यत्किंचिदस्य दृष्टिपथमापतत्तत्प्रियाप्रवृत्तिं सोऽ[illegible]
पप्रच्छ। एवं तेन मयूरः परभृता राजहंसश्चक्रवाको मधु[illegible]
नागराजः शिलोच्चयः सरित्कृष्णसारश्च समेत्याभ्यर्थिताः। [illegible]
स सर्वत्र मप्रातो बभूव। एवं प्रियान्वेषणार्थं परि[illegible]
रक्ताशोकस्तबकसमरागं कमपि शिलाभेदान्तरगतं [illegible]
स च संगमनीयो नाम मणिः गौरीचरणरागसमु[illegible]
मणस्याचिरात्प्रियजनेन संगममावहतीति [illegible] पि [illegible]
हस्ते गृहीत्वा पुनः परिचक्राम। अथ [illegible]
दृष्ट्वा तां स्वप्रियानुकारिणीं च मत्[illegible]
मालायां हतायां तस्याम् यथोर्वशी [illegible]
द्रितया गतासुना चेतनेव त्वं मया [illegible]
प्रसभयाहतान्तःकरणो ममान्तरात्मा [illegible]
द्रितया मया विना भवतीति

XXIII.

The tale of Pururavas and Urvasi.

Part II.

अथ समतिक्रांतेषु केषुचिद्दिवसेषु उर्वशी तं राजर्षिममात्यनिवेदितराज्यधुरं गृहीत्वा गंधमादनवनं विहर्तुं गता। तत्र च मंदाकिन्याः पुलिनेषु स्थिता सिकतापर्वतकेलीभिः क्रीडंतीं विद्याधरदारिका उदयवती नाम तेन राजर्षिणा निध्यातेति कुपितोर्वशी यतो दूरारूढः प्रणयोऽसहनः। ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं प्रविश्य प्रवेशानंतरमेव च काननोपांतवर्तिलताभावेन परिणतमस्या रूपम्। अथ स राजर्षिस्तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रमतिवाहयामास। प्रथमं तापसस्य प्रियया वियोग एकपद उपनतः। अपरं च निर्वृतानामप्युत्कंठाकारी अम्बुदसमयः संप्राप्तः। तेन तस्य दुःखं दुःखानुबंधीव संजातम्। तथा चोन्मत्त इव तस्मिन्वने यत्किंचित्तस्य दृष्टिपथमाययौ तत्प्रियाप्रवृत्तिं सोत्सुकं पप्रच्छ। एवं तेन मयूरः परभृता राजहंसश्चक्रवाको मधुकरो नागराजः शिलोच्चयः सरित्कृष्णसारश्च क्रमेणाभ्यर्थिताः। किं तु स सर्वत्र भग्नाशो बभूव। एवं प्रियान्वेषणार्थं परिभ्रमन्नेकदा रक्ताशोकस्तबकसमरागं कमपि शिलाभेदांतरगतं मणिं ददर्श। स च संगमनीयो नाम मणिः गौरीचरणरागसमुद्भवो धार्यमाणश्चिराद्विप्रियजनेन संगममावहतीति केनापि मुनिनानुशिष्टस्तं गृहीत्वा पुनः परिचक्राम। अंते स एकां कुसुमरहितां लतां दृष्ट्वा तां स्वप्रियानुकारिणीं च मत्वा आलिंगितुं प्रवृत्तः। स्वमायायां लतायां तत्स्थाने यथोर्वशी प्रादुर्भूता। राजा तां विलोक्य गतासुना चेतनेव त्वं मया प्रत्युपलब्धासि त्वद्दर्शनादि प्रसन्नबाह्यांतःकरणो ममांतरात्मा तत्कथय कथमियंत कालमेकया स्थिता मया विना भवतीति तामुवाच। उर्वशी प्रत्युवाच

क्षमा रक्षितेति राज्ञे बाणमुपानयत्। राजा शराभिलिखितानि नामा-
क्षराण्यपश्यत्। उर्वशीसंभवस्यायमैलसूनोर्धनुष्मतः। कुमारस्या-
युषो बाणः प्रहर्ता द्विषदायुषाम्॥ इति॥ तानि वाचयित्वा स
वयस्यमाह। सखे कथमेतत्। अन्यत्र नैमिषेयसत्राद्वियुक्तो-
ऽहमुर्वश्या। न च मया गर्भव्यक्तिरालक्षिता कुत एव प्रसूतिः
केवलं। कानिचिद्दिनानि तस्या वपुः पाण्डुराननच्छायमलसेक्षणं
चाभूत्। माणवक आह। मा भवान्सर्वं मानुषधर्मं दिव्यासु
संभावयतु प्रभावनिगूढानि तासां चरितानि। राजा प्रोवाच।
अस्तु तावदेवं यथा भवानाह पुत्रसंवरणे किमिव कारणं तत्र-
भवत्याः। माणवकः प्रत्युवाच। को देवतारहस्यानि तर्कयिष्यति
इति तयोः संलापे प्रवर्तमाने कंचुकी प्रविश्याह। देव च्यवना-
श्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति। अ-
विलंबितमुभावपि प्रवेशयेत्यादिष्टः कंचुकी तथाकरोत्। माण-
वकः कुमारं विलोक्योवाच। किं नु खलु स एष तत्रभवात्
क्षत्रियकुमारो यन्नामांकितो गृध्रलक्ष्यवेधी नाराचः। तथा बहु-
तरं भवंतमनुकरोति। राजाप्याह। स्यादेवम्। अतः खलु मम
दृष्टिरस्मिन्निपतिता बाष्पायते वात्सल्यबंधि हृदयं मनसः प्रसा-
दश्च। एनं गाढं परिरब्धुमिच्छामि। राज्ञाऽभिवादिता तापसी
सोमवंशविस्तारयित्री भवेत्याशिषं प्रयुज्य कुमारं च प्राह जात
प्रणम ते गुरुम्। कुमारस्तथा कृत्वोपविष्टः। ततो राजा तापसी-
मपृच्छद् भगवति किमागमनप्रयोजनम्। तापसी प्रत्युवाच।
शृणोतु महाराजः। एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि
निमित्तमपेक्ष्य मम हस्ते न्यासीकृतः। यत्क्षत्रियकुमारस्य जात-
कर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितं गृहीतविद्यो
धनुर्वेदेऽभिविनीतः। अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गते-
नानेनाश्रमविरुद्धमाचरितं यदनेन गृहीतामिषः किल गृध्रः
पादपशिखरे निलीयमानो लक्ष्यीकृतो बाणस्य। तत उपलब्ध-
वृत्तांतेन भगवता च्यवनेनाहं समादिष्टा निर्यातय हस्तन्या-

परधानास्मि ऐवेश्वर्येण । नारदस्तमभिनंद्याह । युक्तम् स्वत्कार्यं धारयः कुर्यास्त्वं च तस्येष्टमाचरेः । सूर्यस्तेजसाऽग्निं समेधयत्यग्निः सूर्यं च । इत्युक्त्वा कुमारमायुषं स्वहस्तेनैव यौवराज्येऽभिषिच्य राजानं पप्रच्छ च । किं ते भूयः पाकशासनः प्रियं करोतु । राजोवाच । यदि मे मघवा प्रसन्नः किमतःपरमिच्छामि । तथापीदमस्तु भरतवाक्यम् ।

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥

Vikramorvasiyam.

XXIV

Rama's return journey from Lanka to Ayodhya

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥ १ ॥
वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमंबुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ २ ॥
गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥ ३ ॥
नाभिप्ररूढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥ ४ ॥
पक्षच्छिदा गोत्रभिदात्तगंधाः शरण्यमेनं शतशो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयंते ॥ ५ ॥
एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥ ६ ॥
अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।
अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥ ७ ॥

अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ २२ ॥
त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥ २३ ॥
क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपंकजानामिन्दीवरैरुत्खचितान्तरेव ॥ २४ ॥
क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पंक्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥ २५ ॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ २६ ॥
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गंगा भिन्नप्रवाहा यमुनातरंगैः ॥ २७ ॥
पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥ २८ ॥
जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।
तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ २९ ॥
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव ॥ ३० ॥

Raghuvamsa XIII.

XXV

Another foundling

अथ कदाचिदेकेन तापसेन राजलक्षणविराजितं कंचिदनव- सुन्दरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि । भूवल्लभ कुशसमि- दानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु- मुञ्चन्ती वनिता निरीक्षिता । निर्जने वने किमिति रोदिषीति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत् । मुने काम-

गृहाणेत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरत्। तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि। एनमायुष्मन्तं पितृरूपो भवानभिरक्षतामिति राजा सुहृदापद्विमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदपहृत्य तमुपहारवर्मनामाह्वय राजवाहनमिव पुपोष।

Dasakumàracharita.

XXVI.

Dasaratha and Visvamitra.

अभून्नृपो विबुधसखः परंतपः श्रुतान्वितो दशरथ इत्युदाहृतः।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयम्॥१॥
सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत्सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥२॥
वसूनि तोयं घनवद्व्यकारीत्सहासनं गोत्रभिदाऽध्यवात्सीत्।
न त्र्यम्बकादन्यमुपास्थिताऽसौ यशांसि सर्वेषु भृतां निरास्थत्॥३॥
पुण्यो महाब्रह्मसमूहजुष्टः संतर्पणो नाकसदां वरेण्यः।
जज्वाल लोकस्थितये स राजा यथाऽध्वरे वह्निरभिप्रणीतः॥४॥
स पुण्यकीर्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां समृद्ध्या।
अध्यास्त सर्वर्तुसुखामयोध्यामध्यासितां ब्रह्मभिरिद्धबोधैः॥५॥
निर्माणदक्षस्य समीहितेषु सीमेव पद्मासनकौशलस्य।
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या स्थिताऽवहस्येव पुरं मघोनः॥६॥
धन्यासु कामार्थयशस्करीषु मतासु लोकेऽधिगतासु काले।
विद्यासु विद्वानिव सोऽभिरेमे पत्नीषु राजा तिसृषूत्तमासु॥७॥
पुत्रीयता तेन वराङ्गनाभिरानायि विद्वान्क्रतुषु क्रियावान्।
विरक्तिमत्तान्तविनिर्मलात्मा मान्यो मुनिः स्वां पुरमृष्यशृङ्गः॥८॥
वव्रे स तं कारयितुं प्रशस्तं क्रतुं नृपः पुत्रफलं मुनीन्द्रम्।
ज्ञाताशयस्तस्य ततो व्यतानीत्स कर्मठः कर्म सुतानुबन्धम्॥९॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ १५॥
द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥ १६ ॥
विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ १७॥
पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ १८ ॥
अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम्॥
न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि ॥

Kirátárjuníyam I.

XXVIII.

Bráhman is the efficient cause of the Universe.

चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते।
कस्मादुपसंहारदर्शनात्। इह हि लोके कुलालादयो घटपटादीनां
कर्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः
सन्तस्तत्तत्कार्यं कुर्वाणा दृश्यन्ते। ब्रह्म चासहायं तवाभिप्रेतं तस्य
साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत। तस्मान्न ब्रह्म
जगत्कारणमिति चेन्नैष दोषः। यतः क्षीरवद् द्रव्यस्वभाववि-
शेषादुपपद्यते। यथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिम-
भावेन परिणमतेऽनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति। ननु
क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनम्
औष्ण्यादिकं कथमुच्यते क्षीरवद्धीति नैष दोषः। स्वयमपि हि
क्षीरं यां च यावतीं च परिणाममात्रामनुभवत्येव त्वर्यते त्वौ-

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥१॥

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥२॥

अखंडमाखंडलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता मतंगजेन स्रगिवापवर्जिता ॥४॥

व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृतांगान्निशिता इवेषवः ॥५॥

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥६॥

भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥७॥

अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः ॥८॥

परिभ्रमँल्लोहितचंदनोचितः पदातिरंतर्गिरिरेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥९॥

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुना हरन्करोति मन्युं न कथं धनंजयः ॥१०॥

वनांतशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥११॥

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।
विचिंतयंत्या भवदापदं परां रुजंति चेतः प्रसभं ममाधयः ॥१२॥

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमंगलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥१३॥

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥१४॥

ण्यादिना दधिभावाय । यदि च स्वयं दधिभावशीलता न स्यात् नैवौष्ण्यादिनापि बलाद् दधिभावमापद्येत । न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते । साधनसंपत्त्या च तस्य पूर्णता संपद्यते । परिपूर्णशक्तिकं तु ब्रह्म न तस्यान्येन केनचित् पूर्णता संपादयितव्या । तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद् विचित्रपरिणाम उपपद्यते ।

Shânkarabhâshya

XXIX

The Sun-rise.

अत्रांतरे सरसजृंभितभिन्नपद्म-
भाषाविशेषपरिपोषितविभ्रमंगि ।
पीयूषपेशलसुभाषितभाषिणीभिः
प्रत्यूषमंगलमगीयत मागधीभिः ॥ १ ॥
इयं व्रजति यामिनी त्यज नरेंद्र निद्रारसं
दरिद्रति वियद्द्रुमे कुसुमकांतयस्तारकाः ।
अयं च कुसुमायुधप्रियसुहृत्सखः पंचये-
र्भविष्यति पयोनिधे पुलिनराजहंसः शशी ॥ २ ॥
यातुं भिक्षति भिन्नपङ्कजलिता लीलाशुकानामपि
क्रोडे दंतकरंडपांडुरतनोर्मैत्री विधोश्चंद्रिका ।
पूर्वाशामुखमंडनस्यमचिराद्धंशोरुपस्यति
द्रागुन्मुद्रय देवि पंकजदलच्छायांचने लोचने ॥ ३ ॥
खंडः शशस्य कियतीष्वपि यः कलांगि
भंगीममंगपरयोः सदृशीं बिभर्ति ।
सोऽयं निमज्जति जगन्नयनाभिरामः
श्यामायपूयदनचंदनबिंदुरिंदुः ॥ ४ ॥
क्षिपति निबिरभारं भैरवः कैरवाणा-
मुदयशिखरिलीलाशोणरोचिं मरीचिः ॥

अपश्यता कार्यवशाद् व्यवहारान्नृपेण तु ।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ॥ ३ ॥
रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः ।
सभ्याः पृथक् पृथग्दण्ड्या विवादाद् द्विगुणं दमम् ॥ ४ ॥
स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ ५ ॥
प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।
समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥ ६ ॥
श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ ।
ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ॥ ७ ॥
तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ।
चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥ ८ ॥
अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।
अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ॥ ९ ॥
कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च ।
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ १० ॥
साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥ ११ ॥
छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ १२ ॥
स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ १३ ॥
प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ १४ ॥
सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥ १५ ॥

अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ ९ ॥
पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥ १० ॥
नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ ११ ॥
स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ।
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥ १२ ॥
याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला ।
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥ १३ ॥
आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ते ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ १४ ॥
गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥ १५ ॥
यैस्त्वं गुणगणवानपि सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥ १६ ॥
गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ १७ ॥
अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥ १८ ॥
तरुकुलसुषमापहरां जनयन्तीं जगति जीवजातार्तिम् ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥ १९ ॥

[illegible] ।
[illegible] ॥ ९ ॥
[illegible] ।
[illegible] ॥ १० ॥
[illegible] ।
[illegible] ॥ ११ ॥

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ।
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥ १२ ॥

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला ।
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसी धिग्वारिधीनां जनुः ॥ १३ ॥

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ते ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ १४ ॥

गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥ १५ ॥

यस्य गुणगणश्रवणादपि मनः [illegible] नीतः ।
तामपि वहसि पदाग्रे किं कथयामस्त्वदीयसौभाग्यम् ॥१६॥

गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ १७ ॥

अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥ १८ ॥

[illegible]कुलसुरभिमाहरन्ती जनयन्ती जगति जीवजातार्तिम् ।
[illegible]न गुणेन मयानीलान हिमानिलमिमा वहसि ॥ १९ ॥

कलभ तवांतिकमागतमलिमेनं मा कदाप्यवहासीः ।
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः ॥ २० ॥

स यत्र स्थेमाने दृगुपतिभयभ्रांतनयना
गलद्दानोद्रेकभ्रमदलिकदंबाः करटिनः ।
कुम्भुकाभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥ २१ ॥

ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यच्चातक-
स्त्वां ध्यायन् घन वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्त्रीचक्रे करकानिपातनकृपा तत्कं प्रति ब्रूमहे ॥ २२ ॥

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अपि जलधर शैलश्रेणिशृंगेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥ २३ ॥

सार्धं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमथ च प्रौढिं परामुन्नतेः
किं निन्दाम्यथवा स्तवानि कथय क्षीरार्णव त्वामहम् ॥ २४ ॥
किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यत्र तावकमर्णव वदनं प्रयाति तृषितानाम् ॥ २५ ॥

इयत्यां संपत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कासार सहसा ।
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ २६ ॥
भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।

रे राजहंस वद तस्य सरोरुहस्य
हस्तेन केन मलिनानि कृतोपकारान् ॥ २७ ॥

प्रारंभे कुसुमाकरस्य परितो यस्योल्लसन्मंजरी-
पुंजे मंजुलगुंजितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामंचति
त्वं चेन्मुंचसि चंचरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥ २

स्थितिं नो रे दध्याः क्षणमपि मदांधेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुंभिभ्रांत्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥ २९ ॥

गिरिगह्वरेषु गुरुगर्वगुंफितो
गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनंधयो
भविता करेणुपरिशेषिता मही ॥ ३० ॥

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्रापि निदधे ।
इदं को जानीते यदयमिह कोणांतरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥ ३१ ॥

स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने
चंचूकोटिविपाटितारपुटो यास्याम्यहं पंजरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यंतः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥ ३२

पिब स्तन्यं पोत त्वमिह मददंतावलधिया
दृगंतानाधत्से किमिति हरिदंतेषु परुषान् ।
त्रयाणां लोकानामपि हृदयतापं परिहर-
न्नयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥ ३३ ॥

नीरान्निर्मलतो जनिर्मधुरता वामामुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ।

सर्वस्वं तदहो महाकविगिरां कामस्य चामोदद-
त्वं चेत् प्रीतिमुरीकरोषि मधुपे तस्यां किमाचक्ष्महे ॥३४॥

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥३५॥

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥३६॥

विश्वास्य मधुरवचनैः साधून् ये वञ्चयन्ति नम्रतमाः ।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ॥३७॥

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव काऽपि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥३८॥

आपद्गतः किल महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥३९॥

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुताऽपि नितान्तरम्या ॥४०॥

लीलालुण्ठितशारदापुरमहासंपद्भराणां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत्पामराः ।
अद्य श्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः ॥४१॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥ ५३ ॥
हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥ ५४ ॥
दीनानामिह परिहाय शुष्कसस्या-
न्यौदार्यं प्रकटयतो महीधरेषु ।
औचित्यं परममवाप्य दुर्मदस्य
ज्ञातोऽयं जलधर तावको विवेकः ॥ ५५ ॥
गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥ ५६ ॥
व्योमनि बीजाकुरुते चित्रं निर्माति सुन्दरं पवने ।
रचयति रेखाः सलिले यस्तु खले चरति सत्कारम् ॥ ५७ ॥
किमहं वदामि खल दिव्यमते
गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान्
यदहर्निशं न खलु विस्मरसि ॥ ५८ ॥
रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि ।
अथवालं पापात्मन् कृतया कथयापि ते हतया ॥ ५९ ॥
आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥ ६० ॥
खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि ।
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम् ॥ ६१ ॥
वदने विनिवेशिता भुजङ्गी
पिशुनानां रसनामिषेण धात्रा ।

अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसंति ॥ ४२ ॥
वहति विषधरान् पटीरजन्मा
शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलंकं
पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥ ४३ ॥
सत्पुरुषः खलु हिताचरणैरमंद-
मानंदयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारै-
रिंदुर्विकासयति कैरविणीकुलानि ॥ ४४ ॥
कृतमपि महोपकारं पय इव पीत्वा निरातंकः ।
प्रत्युत हंतुं यतते काकोदरसोदरः खलो जगति ॥ ४५ ॥
खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशंकिभिर्लोकैर्विषेणाशीविषो यथा ॥ ४६ ॥
वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः ।
न हि तुंबीफलविकलो वीणादंडः प्रयाति महिमानम् ॥ ४७ ॥
अमितगुणोऽपि पदार्थो दोषेणैकेन निंदितो भवति ।
निखिलरसायनमहितो गंधेनोग्रेण लशुन इव ॥ ४८ ॥
किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतांधकारोत्करः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासंचयः ॥ ४९ ॥
निष्णातोऽपि च वेदांते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ ५० ॥
नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजंते खंड्यंते चंदनद्रुमाः ॥ ५१ ॥
शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन् द्रागूर्णायुरिव सज्जनो जयति ॥ ५२ ॥

मूर्खस्य लिप्सा कृपणस्य दित्सा
विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री
विधातृसृष्टौ न हि दृष्टपूर्वा ॥ ७२ ॥

Bhâminivilâsa I.

द्वितीयावलिः

SECOND SERIES.

I

A jackal fallen into an indigo-vat.

अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे पतितः । पश्चात्स उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः । अथ नीलीभाण्डस्वामिना मृत इति ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वापसारितस्तस्मात्पलायितः । ततोऽसौ वनं गत्वा स्वकीयमात्मानं नीलवर्णमवलोक्याचिन्तयत् । अहमिदानीमुत्तमवर्णः । तदहं स्वकीयोत्कर्षं किं न साधयामि । इत्यालोच्य शृगालानाहूय तेनोक्तम् । अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः । तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः । शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टाङ्गपातं प्रणम्योचुः । यथाज्ञापयति देवः । इत्यनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव । ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम् । ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान्प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञया स्वज्ञातयः सर्वे दूरी-

अनया कथमन्यथावलीढा
न हि जीवंति जना मनागमंत्राः ॥ ६२ ॥
अविरतं परकार्यकृतां सतां
मधुरिमातिशयेन वचोऽमृतम् ।
अपि च मानसमंबुनिधिर्यशो
विमलशारदचंद्रिचंद्रिका ॥ ६३ ॥
पस्य कुसुमाकरो मे संजीवयिता चिरं चिरं मनाम् ।
इति चिंतयतो हृदये पिकस्य समधायि शौभिकेन शरः ॥ ६४
निर्गुणः शोभते नैव विपुलाडंबरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ॥ ६५ ॥
पंकैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥ ६६ ॥
तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरंदानामंतरेण मधुव्रतम् ॥ ६७ ॥
यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥ ६८ ॥
संतः स्वतः प्रकाशंते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेनानुभाव्यते ॥ ६९ ॥
अयि बत गुरु गर्वं माऽस्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यंतदीनं
स्वकमनुनय प्राणहीनं करोषि ॥ ७० ॥
दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरंतनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
संगः सतां किमु न मंगलमातनोति ॥ ७१ ॥
अनवरतपरोपकारव्यग्रीभवदमलचेतसां महताम् ।
आपातकाटवानि स्फुरंति वचनानि भेषजानीव ॥ ७

कृताः। ततो विषण्णान् शृगालानवलोक्य केनचिद् वृद्धशृगाले-
नैतत्प्रतिज्ञातम्। मा विषीदत यदनेनानभिज्ञेन नीतिविदो
मर्मज्ञा वयं स्वसमीपात्परिभूतास्तद्यथायं नश्यति तथा विधेयम्।
यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजान-
मिमं मन्यन्ते। तद्यथायं परिचितो भवति तथा कुरुत। तत्र चैवमनुष्ठे-
यम्। यतः सर्वे संध्यासमये संनिधाने महारावमेकदैव करिष्यथ
ततस्तं शब्दमाकर्ण्य जातिस्वभावात्तेनापि शब्दः कर्तव्यः।
ततस्तथानुष्ठिते सति तद् वृत्तम्। यतः

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम्॥ १॥

ततः शब्दादभिज्ञाय स व्याघ्रेण हतः। अतोऽहं ब्रवीमि।

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत्॥ २॥

Hitôpadesa III.

II.

Monkeys advised by a bird.

अस्ति कस्मिंश्चित्पर्वतैकदेशे वानरयूथम्। तच्च कदाचिद्धे-
मन्तसमयेऽतिसंस्पर्शवातोद्वेपमानकलेवरं प्रवर्षद्घनधारानिपा-
तसमाहतं न कथंचिच्छान्तिमगमत्। अथ केचिद्वानरा वह्निकण-
सदृशानि गुञ्जाफलानि विचित्य वह्निवाञ्छया फूत्कुर्वतः समन्तात्
तस्थुः। अथ सूचीमुखो नाम पक्षी तेषां वृथायासमवलोक्य
प्रोवाच। भो भवन्तः सर्वे मूर्खतमाः। नैते वह्निकणा वह्निकणाकार-
रक्तानि गुञ्जाफलान्येतानि। तत्किं वृथा श्रमेण। नैतस्माच्छीत-
रक्षा भवति। तदन्विष्यतां कश्चिन्निर्वातो वनप्रदेशो गुहा वा
गिरिकन्दरं वा। अद्यापि साटोपा मेघा दृश्यन्ते। अथ तेषामे-
कतमो वृद्धवानरस्तमुवाच। भोः किं तवानेन व्यापारेण।

तदस्यताम्। सोऽपि भयमानोऽपि मूर्खोऽपि वानराननवरतमाह। भोः किं वृथा क्लेशेन। अथ यावदसौ न कथंचिदपि विरमति तावदेकेन वानरेण व्यर्थश्रमत्वात्कुपितेन पक्षाभ्यां गृहीत्वा शिलायामास्फालित उपरतश्च। अतोऽहं ब्रवीमि।

नानाम्यं नमते दारु नाश्मनि स्यात्क्षुरक्रिया।
सूचीमुखं विजानीहि नाशिष्यायोपदिश्यते॥

Panchatantra I.

III.

General precepts of advice.

दैवं दैवेऽपि भूतेषु धारयन्धर्मणीप्सितः।
प्रजाः स्वधनप्रदीपात्प्रजापतिरिव स्वयम् ॥ १ ॥

वाक् सूनृता दया दानं दीनोपगतरक्षणम्।
इति वृत्तं सतां साधु हितं सत्पुरुषव्रतम् ॥ २ ॥

आविष्ट इव दुःखेन तद्गतेन गरीयसा।
समन्वितः करुणया परया दीनमुद्धरेत् ॥ ३ ॥

न तेभ्योऽभ्यधिकाः सन्तः सन्ति सत्पुरुषव्रताः।
दुःखपङ्कार्णवे मग्नं दीनमभ्युद्धरन्ति ये ॥ ४ ॥

दयामालम्ब्य परमां धर्मादविचलन्नृपः।
पीडितानामनाथानां कुर्यादश्रुप्रमार्जनम् ॥ ५ ॥

आनृशंस्यं परो धर्मः सर्वप्राणभृतां यतः।
तस्माद्राजानृशंस्येन पालयेत्कृपणं जनम् ॥ ६ ॥

न हि स्वसुखमन्विच्छन्पीडयेत्कृपणं नृपः।
कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ॥ ७ ॥

को हि नाम कुले जातः सुखलेशेन लोभितः।
अल्पसाराणि भूतानि पीडयेदविचारयन् ॥ ८ ॥

प्रणिपातेन हि गुरून् सतोऽनूचानचेष्टितैः।
कुर्वीताभिमुखान्भृत्यं देवान् सुकृतकर्मणा ॥ २३ ॥
सद्भावेन हरेन्मित्रं सम्भ्रमेण च बांधवान्।
स्त्रीभृत्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् ॥ २४ ॥
अनिन्दा परकृत्येषु स्वधर्मपरिपालनम्।
कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ॥ २५ ॥
प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे।
गृहागते परिष्वंगः शक्त्या दानं सहिष्णुता ॥ २६ ॥
बंधुभिर्बंधुसंयोगः स्वजने चरितानि च।
तच्चित्तानुविधायित्वमिति वृत्तं महात्मनाम् ॥ २७ ॥
सनातने वर्त्मनि साधु तिष्ठतामयं हि पंथा गृहमेधिनां मतः।
अनेन गच्छन्नियतं महात्मनामिमं च लोकं परमं च विन्दति २८

Kámandaki-Nitisára.

IV

Charudatta on poverty.

चारुदत्तः। [ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य]

यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः।
[illegible]
[illegible] १ ॥

विदूषकः। एष आर्यचारुदत्तः। तद् यावत्सांप्रतमुपसर्पामि।
(उपसृत्य) स्वस्ति भवते। वर्धतां भवान्।
चारु०। अये सर्वकालमित्रं मैत्रेयः प्राप्तः। सखे स्वागतम्।
आस्यताम्।

मापिष्ठ्ठधिराजिराग मत्त भ्यां मा स्विकाद्दिते ।
को हि नाम शरीरस्य धर्मार्थेन समाचरेत् ॥ ९ ॥
महात्मानाहुत्स्यांशिष्टमात्मनिरेत्यधैः ।
कथं नाम महात्मानो द्विपन्ते निरन्तरिभि: ॥ १० ॥
गजानवोपुचरतं जीवन मात् वृद्दिनाम् ।
मर्गाविशाोनि भाषा शवकल्याणकामरेत् ॥ ११ ॥
सान्यगृणमृगामृतं भीतस्य प्रणवंगुणम् ।
मज्जन लेगन वर्गोद्धमाग न गृणाय न ॥ १२ ॥
हिमांशुमाली न तथा न चान्द्रस्तोभम गत: ।
आनन्दयति चेतांसि यथा सज्जनवाणिनम् ॥ १३ ॥
मन शीलशालपमानकरमांदन दुर्जनः ।
अंग प्रविश्य ददति नृपकृष्णाविषावल. ॥ १४ ॥
नि श्यामोऽधिकलनभुग्धमधुश्रीकृत्यानकैः ।
परमार्थांथिन मेग कुर्याम न्चेय दुर्जनै ॥ १५ ॥
मसाप्य साधुमत्राणा नैव पापियमुन्स्दृजन् ।
ब्रिजिह्वदनं धत्त दुष्टो दुर्जनपन्नग ॥ १६ ॥
द्विद्धि विद्ध श्यात्यर्थं यथा सनप्यते जन. ।
पीडितोऽपि हि मेधावी न तां वाचमुदीरयेत् ॥ १७ ॥
प्रियंसदाभिधानस्य नित्यं सन्तु द्विप न च ।
नीलीव ककामभुग्‍ प्रियवाक कस्य न प्रिय: ॥ १८ ॥
मर्ल्यमितयने शिखिन· केकया मयूरकथा ।
वाचा विपाश्चितोऽत्यर्थं माधुर्यगुणयुक्तया ॥ १९ ॥
गुणानुरागी स्थितिमान् श्रद्धातो दयान्वित: ।
घन धर्माय विसृजन प्रियां [illegible] मुदीरयंम् ॥ २० ॥
ये प्रियाणि प्रभाषन्ते प्रग[illegible] [illegible]पत्क्रान्तिम् ।
श्रीमतोऽनिघचरितेन, [illegible] ॥ २१ ॥
शुचिरास्तिक्यपूतात्मा [illegible] ।
[illegible] ॥

आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ ९ ॥
महावाताहतप्रांतमेघमालातिपेलवैः ।
कथं नाम महात्मानो ह्रियंते विषयारिभिः ॥ १० ॥
जलांतश्चंद्रचपलं जीवनं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् ॥ ११ ॥
जगन्मृगतृषातुल्यं वीक्ष्येदं क्षणभंगुरम् ।
सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥ १२ ॥
हिमांशुमाली न तथा न चोत्फुल्लोत्पलं सरः ।
आनंदयति चेतांसि यथा सज्जनचेष्टितम् ॥ १३ ॥
सतः शीलोपसंपन्नानकस्मादेव दुर्जनः ।
अंतः प्रविश्य दहति शुष्कवृक्षानिवानलः ॥ १४ ॥
निःश्वासोद्गीर्णहुतभुग्धूमधूम्रीकृताननैः ।
वरमाशीविषैः संगं कुर्यान्न त्वेव दुर्जनैः ॥ १५ ॥
असाध्यं साधुमंत्राणां तीव्रं वाग्विषमुत्सृजन् ।
द्विजिह्ववदनं धत्ते दुष्टो दुर्जनपन्नगः ॥ १६ ॥
हृदि विद्ध इवात्यर्थं यया संतप्यते जनः ।
पीडितोऽपि हि मेधावी न तां वाचमुदीरयेत् ॥ १७ ॥
प्रियमेवाभिधातव्यं नित्यं सत्सु द्विषत्सु च ।
शिखीव केकामधुरः प्रियवाक् कस्य न प्रियः ॥ १८ ॥
मदाक्रियंते शिखिनः केकया मदरक्तया ।
वाचा विषाधितोऽस्वर्यं माधुर्यगुणयुक्तया ॥ १९ ॥
गुणानुरागी स्थितिमान् श्रद्दधानो दयान्वितः ।
धनं धर्माय विसृजन् प्रियां वाचमुदीरयेत् ॥ २० ॥
ये प्रियाणि प्रभाषंते प्रयच्छंति च सत्कृतिम् ।
श्रीमंतोऽनिंद्यचरिताः ते नरविग्रहाः ॥ २१ ॥
शुचिरास्तिकपक्षाणामभ्यस्तःऽपेक्ष्यणाः सदा ।
देवतापर गुरुजनमात्मवश्च सुहृज्जनम् ॥ २२ ॥

विदू० । पटं समाघ्रापयति । भो वयस्य एष ते प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्य आर्यचारुदत्तस्य त्वया उपनेतव्य इति । (समर्पयति)

चारु० । (गृहीत्वा सचिन्तः स्थितः)

विदू० । भो इदं किं चिन्त्यते ।

चारु० । वयस्य

सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥ २ ॥

विदू० । भो वयस्य मरणाद्दारिद्र्याद्वा कतरत्ते रोचते ।

चारु० । वयस्य

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥ ३ ॥

विदू० । भो वयस्य अलं सन्तापितेन । प्रणयिजनसंक्रामितविभवस्य सुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि ते अधिकतरं रमणीयः ।

चारु० । वयस्य न ममार्थान्प्रति दैन्यम् । पश्य

एतत्तु मां दहति यद् गृहमस्मदीयं
क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम् ॥ ४ ॥

विदू० । भो वयस्य एते खलु दास्याः पुत्रा अर्थकल्यवर्ता वरटाभीता इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति ।

चारु० । वयस्य

सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवंति ॥ ५ ॥

अपि च

दारिद्र्याद् ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ ६ ॥

विदू० । भो वयस्य तमेव अर्थकल्यवर्तं स्मृत्वा अलं संतापितेन ।

चारु० । वयस्य दारिद्र्यं हि पुरुषस्य
निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् ।
वनं गंतुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति संतापयति च ॥ ७ ॥

वयस्य कृतो मया गृहदेवताभ्यो बलिः । गच्छ त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर ।

विदू० । न गमिष्यामि ।

चारु० । किमर्थम् ।

विदू० । यत एवं पूज्यमाना अपि देवता न ते प्रसीदंति तत्को गुणो देवेष्वर्चितेषु ।

चारु० । वयस्य मा मैवम् । गृहस्थस्य नित्योऽयं विधिः ।
तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः ।
तुष्यंति शमिनां नित्यं देवताः किं विचारितैः ॥ ८ ॥
तद्गच्छ मातृभ्यो बलिमुपहर ।

विदू० । भो न गमिष्यामि । अन्यः कोऽपि प्रयुज्यताम् । मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति आदर्शगता इव छाया वामतो दक्षिणा दक्षिणतो वामा । अन्यच्च एतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेटाश्च राजवल्लभाः संचरंति ।

VI.

An old woman's tale.

पयोऽस्मि पर्यटन्नेकदा गतो विदेहेषु। मिथिलामप्रविश्यैव बहिः क्वचिन्मठिकायां विश्रमितुमेत्य कयापि वृद्धतापस्या दत्तपाद्यः क्षणमलिन्दभूमावध्यासिषि। तस्यास्तु मद्दर्शनादेव किमप्यबद्धधारमश्रु प्रावर्तत। किमेतदम्ब कथय कारणमिति पृष्टा सकरुणमाचष्ट। जैवातृक ननु श्रूयते पतिरस्या मिथिलायाः प्रहारवर्मा नामासीत्। तस्य खलु मगधराजो राजहंसः परं मित्रमासीत्। तयोश्च वल्लभे बलाबलयोरिव वसुमतीप्रियंवदे सख्यमप्रतिममधत्ताम्। अथ प्रथमगर्भाभिनन्दितां तां च प्रियसखीं वसुमतीं दिदृक्षुः प्रियंवदा सह भर्त्रा पुष्पपुरमगतम्। तस्मिन्नेव च समये मालवेन मगधराजस्य महज्जन्यमजनि। तत्र हेलातोऽपि दुर्लक्षां गतिमगमन्मगधराजः। मैथिलेन्द्रस्तु मालवेन्द्रप्रयत्नप्राणितः स्वविषयं प्रतिनिवृत्तो ज्येष्ठस्य संहारवर्मणः सुतैर्विकटवर्मप्रभृतिभिर्व्याप्तं राज्यमाकर्ण्य स्वस्रीयात्सुह्मपतेर्दण्डावयवमादित्सुरटवीपथमवगाह्य लुब्धकलुप्तसर्वस्वोऽभूत्। तत्सुतेन च कनीयसा हस्तवर्तिना सहैकाकिनी वनचरशरवर्षभयपलायिता वनमगाहिषि। तत्र च मे शार्दूलनखावलीढनिपतितायाः पाणिभ्रष्टः स बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत। तच्छवाकर्षिणश्च व्याघ्रस्यासूनिषुरिष्वसनयन्त्रमुक्तः क्षणादलिक्षत्। भिल्लदारकैः स बालोऽपाहारि। सा त्वहं मोहसुप्ता केनापि वृष्णिपालेनोपनीय स्वं कुटीरमावेश्य कृपोपपन्नात्मना स्वस्थीभूय स्वभर्तुरन्तिकमुपतिष्ठासुरसहायतया यावद्व्याकुलीभवामि तावन्ममैव दुहिता सह यूना केनापि तमेवोद्देशमागतम्। सा भृशं रुरोद। रुदितान्ते च सा सार्थघाति स्वहस्तगतस्य राजपुत्रस्य किरातभर्तृहस्तगमनमात्मनश्च केनापि वनचरेण प्रणयिरोपणं तस्यायाश्च पुनस्तेनापयन्तुं चिकितायाः

निकृष्टजातिसंसर्गविप्रदुष्टाचारमत्याप्त्यापनतादृश्यं तद्दुःखमेव वायुना विविक्ते विपिने स्वशिरःकर्तनोपक्रममनेन यूना यदृच्छया दृष्टेन तस्य दुरारम्भो हननमात्मनश्चोपायमममभिरयकथयत्। स तु पुत्रो मैथिलेन्द्रस्यैव कोऽपि सेवकः कारणाविलंबी तन्मार्गानुसारी जातः। सह तेन भर्तुरंतिकमुपसृत्य पुत्रवृत्तांतेन श्रोत्रमस्य देव्याः निर्वपयाश्वासदाय। स च राजा विकटवर्मणाग्रज्येष्ठपुत्रैश्चिरं विगृह्य पुनरसहिष्णुतयातिमात्रं चिरं प्रयुध्य बद्धः। देवी च बंधनं गमिता। तस्या पुनरहमस्मिन्नपि वार्धके हतजीवितमपारयंती दातुं मज्ज्यां किलाग्रहीषम्। दुहिता तु मम हतजीविताकल्पा विकटवर्ममहादेवी कल्पसुंदरी किलाधिशियत्। तां चेद्राजपुत्रो निकषप्रयाधेयाधिष्ठेतामिवमा कालेन तथैवं यदोपरपामरमस्ये- ताम्। तयोश्च सतोर्न दायादा मे भूत्वा प्रसह्यकारिणो भवेयुरिति ममन्युरभिरुरोध।

Dashakumaracharita.

VII.

Krishna on the immortality of the soul.

संजय उवाच।

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

अर्जुन उवाच।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ५ ॥

संजय उवाच।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप।
न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥ ६ ॥
तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ ७ ॥
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ८ ॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति ॥९ ॥
य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हंति न हन्यते ॥ १० ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ ११ ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हंति कम् ॥ १२ ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ १३ ॥

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ १४ ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ १५ ॥

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ १६ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ १७ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ १८ ॥

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ १९ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥ २० ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ २१ ॥

अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ २२ ॥

भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ २३ ॥

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः ।
निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ २४ ॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ २५ ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ २६ ॥

Bhagavadgeetâ II.

VIII.

The tale of Mahashvetà.

Part I.

एतत् प्रायेण भवतः श्रुतिविषयमापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः संतीति। तासां चतुर्दश कुलानि गंधर्वाणां तु दक्षात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम्। तत्र मुनेस्तनयश्चित्रसेनादीनां पंचदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः। इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानंतरे किंपुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः। अरिष्टायास्तु पुत्रस्तुंबुरुप्रभृतीनां सोदर्याणां षण्णां ज्येष्ठो हंसो नाम जगद्विदितो गंधर्वस्तस्मिन्द्वितीये गंधर्वकुले गंधर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान्। अपरिमितगंधर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः। यत्तु तत्सोममयूखसंभवमप्सरसां कुलं तस्मात् त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिमकरकिरणावदातवर्णा कन्यका प्रसूता। तां च द्वितीयगंधर्वकुलाधिपतिर्हंसो मंदाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत्। सा तु भगवता मकरकेतनेनेव रतिः शरत्समयेनेव कमलिनी हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती निखिलांतःपुरस्वामिनी च तस्याभवत्।

तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना। तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मम जन्माभिनंदितवान्। अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्। साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गंधर्वाणामंकादंकं संचरंत्यविदितशोकायासमनोहरं शैशवमतीतवती। क्रमेण च कृते मे वपुषि वसंत इव मधुमासेन

मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधु-करेण मधुकर इव मदेन नवयौवनेन पदम्।

अथ सकलजीवलोकहृदयानंदकेषु मधुमासदिवसेष्वेकदाहमंबया सह मधुमासविस्तारितशोभमिदमच्छोदं सरः स्नातुमभ्यागमम्। अत्र च स्थपेकमानीर्थेशकानि वंदमाना स्निग्धमनोहरतपोदेवतादर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम्। अथै-कस्मिन्प्रदेशे हठादिव वनानिलेनोपनीतमनाघ्रातपूर्वममानुष-लोकोचितं कुसुमामोदमभ्यजिघ्रम्। कुतोऽयमिति सुपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगंधेन मधुकरीवाकृष्यमाणा कतिचित्पदानि गत्वा विलासमिव सरस्वत्याः स्वयंवरपतिमिव सर्वविद्यानां संकेतस्थानमिव सर्वश्रुतीनामात्मानुरूपेण वयसाऽ-परेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतमति-मनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां वसंतदर्शनानंदितायाः स्मितप्रभामिव वनश्रियः कलिकातारास्तबकानुकारिणीममृतबिंदुनिस्यंदिनीम-दृष्टपूर्वां कुसुममंजरीमद्राक्षम्। अस्याः परिभूतान्यकुसुमामोदो नूनमयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाऽ-हमचिंतयम्। अहो रूपातिशयनिष्पादनोपकरणकौशलस्या-क्षीणता विधातुर्यत्त्रिभुवनाद्भुतरूपसंभारं भगवंतं कुसुमायुध-मुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकर-ध्वजरूपधारितः। मन्ये च सकलजगन्नयनानंदकरं शशिबिंबं विरचयता प्रजापतिना प्रथममेतदाकारकरणकौशलाभ्यास एव कृतोऽन्यथा किमिव हि सदृशवस्तुविरचनायाः कारणम्। इति चिंतयंतीमेव मामविचारितगुणदोषविशेषो रूपैकपक्ष-पाती नवयौवनसुलभः कुसुमासवमद इव मधुकरीं परवशाम-करोत्।

आसीच्च मम मनसि। शांतात्मनि दूरीकृतमदनव्यतिकरेऽ-स्मिञ्जने मां निक्षिपता किमिदमनार्येणासदृशमारब्धं मनसिजेन।

स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशांतये।
सिंहो जंबुकमंकमागतमपि त्यक्त्वा निहंति द्विपं
सर्वः कृच्छ्रगतोऽपि वांछति जनः सत्वानुरूपं फलम्॥
लांगूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिंडदस्य कुरुते गजपुंगवस्तु
धीरं विलोकयति चाटुशतैश्च भुंक्ते ॥ ३ ॥
कुसुमस्तबकस्येव द्वे गती स्तो मनस्विनाम्।
मूर्ध्नि वा सर्वलोकस्य विशीर्यंत वनेऽथवा ॥ ४ ॥
सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पंचषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ ५ ॥
वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ६ ॥
वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चायं संपातः पयसि पयसां पत्युरुचितः ॥ ७ ॥
यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ८ ॥
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु
प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः ॥ ९ ॥

Bhartrihari II.

XI.

A feigned quarrel between Chanakya and Chandragupta.

Part I.

राजा (स्वगतम्)। राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम्। कुतः।

परार्थानुष्ठाने रहयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः।
परार्थश्चेत्स्वार्थादभिमततरो हंत परवान्
परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः॥ १॥

अन्यच्च। कृतककलहं कृत्वा स्वतंत्रेण किंचित्कालांतरं व्यवहर्तव्यमित्यार्यादेशः। स च कथमपि मया पातकमिवाभ्युपगतः। (प्रकाशम्) आर्य वैहीनरे सुगांगमार्गमादेशय।

कंचुकी। इत इतो देवः। (नाट्येन परिक्रम्य)। अयं सुगांगप्रासादः। शनैरारोहतु देवः।

राजा। (नाट्येनारुह्य दिशोऽवलोक्य) अहो शरत्समयसंभृतशोभानां दिशामतिरमणीयता। (समंतान्नाट्येनावलोक्य) अये कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम्। आर्य वैहीनरे अपि मद्वचनादाघोषितः कुसुमपुरे कौमुदीमहोत्सवः।

कं०। अथ किम्।

राजा। तत्किं न गृहीतमस्मद्वचनं पौरैः।

कं०। (कर्णौ पिधाय) शांतं पापम् शांतं पापम्। पृथिव्यामस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति।

राजा। तत्कथमप्रवृत्तकौमुदीमहोत्सवमद्यापि कुसुमपुरम्।

कं०। एवमेवैतत्।

राजा। किमेतत्।

कं०। देव इदम्।

राजा। स्फुटं कथय।

कं० । प्रतिषिद्धः कौमुदीमहोत्सवः ।

राजा । (सक्रोधम्) आः केन ।

कं० । देव नातःपरं विज्ञापयितुं शक्यम् ।

राजा । न खलु आर्यचाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः ।

कं० । देव कोऽन्यो जीवितुकामो देवस्य शासनमतिवर्तेत ।

राजा । शोणोत्तरे उपवेष्टुमिच्छामि ।

प्रतीहारी । देव इदं सिंहासनम् ।

राजा (नाट्येनोपविश्य) आर्य वैहीनरे आर्यचाणक्यं द्रष्टुमिच्छामि ।

कं० । यदाज्ञापयति देवः । (इति चाणक्यमुपगम्य जानुभ्यां भूमौ निपत्य) । जयत्वार्यः ।

चाण० । वैहीनरे किमागमनप्रयोजनम् ।

कं० । सुगृहीतनामधेयो देवश्चन्द्रगुप्त आर्यं शिरसा प्रणम्य विज्ञापयति । अकृतक्रियान्तरायमार्यं द्रष्टुमिच्छामीति ।

चाण० । वृषलो मां द्रष्टुमिच्छति । वैहीनरे न खलु वृषलश्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः ।

कं० । आर्य अथ किम् ।

चाण० । (सक्रोधम्) आः केन कथितम् ।

कं० । (सभयम्) प्रसीदत्वार्यः । स्वयमेव सुगाङ्गप्रासादगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवं पुरम् ।

चाण० । आः ज्ञातम् । ततो भवद्भिरन्तरा प्रोत्साह्य कोपितो वृषलः । किमन्यत् ।

कं० । (भयं नाटयंस्तूष्णीमधोमुखस्तिष्ठति) ।

चाण० । अहो राजपरिजनस्य चाणक्योपरि प्रद्वेषपक्षपातः । अथ क्व वृषलः ।

कं० । (सभयं नाटयन्) आर्य सुगाङ्गगतेन देवेनाहमार्यचरणमूलं प्रेषितः ।

चाण० । (उत्थाय) सुगांगमार्गमादेशय ।

कं० । इत इत आर्यः । (उभौ परिक्रामतः) ।

कं० । एष सुगांगप्रासादः । शनैरारोहत्वार्यः ।

चाण० (नाट्येनारुह्यावलोक्य च) । अये सिंहासनमध्यास्ते वृषलः । साधु साधु ।

> नन्दैर्वियुक्तमनपेक्षितराजराजै-
> रध्यासितं च वृषलेन वृषेण राज्ञाम् ।
> सिंहासनं सदृशपार्थिवसंगतं च
> प्रीतिं परां प्रगुणयंति गुणा ममैते ॥ २ ॥

(उपसृत्य) विजयतां वृषलः ।

राजा । (आसनादुत्थाय) । आर्य चंद्रगुप्त प्रणमति । (इति पादयोः पतति) ।

चाण० (पाणौ गृहीत्वा) । उत्तिष्ठोत्तिष्ठ वत्स ।

राजा० (उत्थाय) । तदुपविशत्वार्यः । (उभौ यथोचितमुपविष्टौ) ।

चाण० । वृषल किमर्थं वयमाहूताः ।

राजा । आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् ।

चाण० । (सस्मितम्) । अलमनेन प्रश्रयेण । न निष्प्रयोजनमधिकारवंतः प्रभुभिराहूयंते ।

राजा । आर्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति ।

चाण० । (स्मितं कृत्वा) । उपालब्धुं तर्हि वयमाहूताः ।

राजा । शांतं पापम् । शांतं पापम् । नहि नहि । विज्ञापयितुम् ।

चाण० । यद्येवं तर्हि विज्ञापनीयानामवश्यं शिष्येण स्वरुचयो न निरोद्धव्याः ।

राजा । एवमेतत् कः संदेहः । किंतु न कदाचिदार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः ।

चाण०। वृषल सम्यग्गृहीतवानसि न प्रयोजनमंतरेण चाणक्यः स्वप्नेपि चेष्टत इति।

राजा। आर्य अत एव शुश्रूषा मां मुखरयति।

चाण०। वृषल श्रूयताम्। इह खल्वर्थशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयंति राजायत्तां सचिवायत्तामुभयायत्तां चेति। ततः सचिवायत्तसिद्धेस्तव किं प्रयोजनान्वेषणेन। यतो वयमेवात्र नियुक्ता वेत्स्यामः।

(राजा सकोपं मुखं परावर्तयति)।

(नेपथ्ये कालोचितजनसमयौ श्लोकौ वैतालिकौ पठतः)

Mudrârâkshasa III.

XII.

A feigned quarrel between Chanakya and Chandragupta.

Part II.

राजा। आर्य वैहीनरे आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय।

कं०। यदाज्ञापयति देवः। (इति उत्थाय परिक्रामति)।

चाण०। (सक्रोधम्)। वैहीनरे तिष्ठ। न गंतव्यम्। वृषल किमयमस्थाने महानर्थोत्सर्गः।

राजा (सकोपम्)। आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बंधनमिव राज्यं न राज्यमिव।

चाण०। वृषल स्वयमनभियुक्तानां राज्ञामेते दोषाः संभवंति। तद्यदि न सहसे ततः स्वयमभियुज्यस्व।

राजा। एते स्वकर्मण्यभियुज्यामहे।

चाण०। प्रियं नः। वयमपि स्वकर्मण्यभियुज्यामहे।

राजा। यद्येवं तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत्प्रयोजनं श्रोतुमिच्छामि।

चाण०। वृषल कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि।

राजा। प्रथमं तावन्ममाज्ञाव्याघातः।

चाण०। वृषल ममापि तवाज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनम्। अथ त्वमपरमपि प्रयोजनं श्रोतुमिच्छसि तदपि कथयामि।

राजा। कथ्यताम्।

चाण०। शोणोत्तरे मद्वचनात्कायस्थमचलं ब्रूहि यत्तद्भद्रभटप्रभृतीनामितोऽपरागादपक्रम्य मलयकेतुमाश्रितानां लेख्यपत्रं दीयतामिति।

प्रती०। यदार्य आज्ञापयति (निष्क्रम्य पुनः प्रविश्य)। आर्य इदं पत्रकम्।

चाण०। (गृहीत्वा) वृषल दृश्यतामिदम्।

राजा (आत्मगतं वाचयति)। (प्रकाशम्) आर्य एतदेव तावत्पत्रकम् अथैतेषामपरागहेतून्विज्ञातुमिच्छामि।

(चाणक्यस्तान्कथयति)।

राजा। एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण।

चाण०। वृषल न पारितं प्रतिविधातुम्।

राजा। किमकौशलादुत प्रयोजनापेक्षया।

चाण०। कथमकौशलं भविष्यति। प्रयोजनापेक्षयैव।

राजा। प्रयोजनमिदानीं श्रोतुमिच्छामि। [चाणक्यस्तदपि कथयति]।

चाण०। तदियमनुगृहीतास्मत्पक्षा राक्षसोपदेशप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृवधामर्षी पर्वतकपुत्रो मलयकेतुरस्मा-

मभियोक्तुमुद्यतः सोऽयं व्यायामकालो नोत्सवकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेनेति प्रतिषिद्धः ।

राजा । आर्य बहु प्रष्टव्यमत्र ।

चाण० । वृषल विस्रब्धं पृच्छ । ममापि बहु आख्येयमत्र ।

राजा । सोऽप्यस्य सर्वस्यानर्थस्य हेतुर्मलयकेतुः कस्मादपक्रामन्नुपेक्षितः ।

चाण० । वृषल अनुपेक्षणे द्वयी गतिः । निगृह्येत वा प्रतिश्रुतं राज्यार्धं प्रतिपाद्येत वा । निग्रहे तावत्पर्वतकोऽस्माभिरेव व्यापादित इति कृतघ्नतायाः स्वहस्तो दत्तः स्यात् । प्रतिश्रुतराज्यार्धप्रतिपादनेऽपि पर्वतकविनाशः केवलं कृतघ्नतामात्रफलः स्यादिति मलयकेतुरपक्रामन्नुपेक्षितः ।

राजा । अत्र तावदेवम् । राक्षसः पुनरिहैव वर्तमान आर्येणोपेक्षित इत्यत्र किमुत्तरमार्यस्य ।

चाण० । राक्षसोऽपि स्वामिनि स्थिरानुरागित्वात्सुचिरमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तविश्वास्यः प्रज्ञापुरुषकाराभ्यामुपेत इहैवान्तर्नगरे वर्तमानः खलु महान्तमन्तःकोपमुत्पादयेत् । दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि कथमप्युपायैर्वशयितुं शक्य इत्ययमत्रस्थ एव हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः ।

राजा । आर्य कस्माद्विक्रम्य न गृहीतः ।

चाण० । राक्षसः खल्वसौ । विक्रम्य गृह्यमाणो युष्मद्बलानि बहूनि घातयेत्स्वयं वा विनश्येत् । एवं सत्युभयथापि दोषः ।

राजा । न शक्नुमो वयमार्यस्य मतिमतिशयितुम् । सर्वथा अमात्यराक्षस एवात्र प्रशस्यतरः ।

चाण० । (सक्रोधम्) न भवानिति वाक्यशेषः । भो वृषल तेन किं कृतम् ।

राजा । श्रूयताम् । तेन खलु महात्मना

हम्पायां पुरि यावदिच्छमुषितं कृत्वा पदं नो गले
व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः ।
अत्यर्थं विपुलैः स्वनीतिविभवैः संमोहमापादिता
विश्वास्येष्वपि विश्वसंति मतयो न स्वेषु वर्गेषु नः ॥ १ ॥

चाण० । (विहस्य) । एतत्कृतं राक्षसेन । वृषल मया पुनर्ज्ञातं नंदमिव भवंतमुद्धृत्य भवानिव भूतले मलयकेतू राजाधिराजपदे नियोजित इति ।

राजा । अन्येनैवेदमनुष्ठितं किमत्रार्यस्य ।

चाण० । हे मत्सरिन् सकलरिपुकुलोत्सादद्दीर्घां प्रतिज्ञामारुह्य केनान्येनापनीता नवनवतिशतद्रव्यकोटीश्वरास्ते नंदाः पश्यतो राक्षसस्य पर्यायभूताः पशव इव हताः ।

राजा । अन्येनैवेदमनुष्ठितम् ।

चाण० । अथ केन ।

राजा । नंदकुलविद्वेषिणा दैवेन ।

चाण० । दैवमविद्वांसः प्रमाणयंति ।

राजा । विद्वांसोऽप्यविकत्थना भवंति ।

चाण० । (सकोपम्) वृषल भृत्यमिव मामारोढुमिच्छसि ।
शिखां मोक्तुं बद्धामपि पुनरयं धावति करः
(भूमौ पादं प्रहृत्य)
प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः ।
प्रणाशान्नंदानां प्रशममुपयातं त्वमधुना
परीतः कालेन ज्वलयसि मम क्रोधदहनम् ॥ २ ॥

राजा (सावेगमात्मगतम्) । अये कथं सत्यमेवार्यः कुपितः ।

चाण० । (कृतककोपं संहृत्य) । वृषल वृषल अलमुत्तरोत्तरेण । यद्यस्मत्तो गरीयान्राक्षसोऽवगम्यते तदिदं शस्त्रं तस्मै दीयताम् । (इति शस्त्रमुत्सृज्योत्थाय आकाशे लक्ष्यं बद्ध्वा स्वगतम्) । राक्षस राक्षस एष भवतः कौटिल्यस्य बुद्धिविजिगीषोर्बुद्धेः प्रकर्षः ।

चाणक्यतश्चलितभक्तिमहं सुखेन
जेष्यामि मौर्यमिति संप्रति यः प्रयुक्तः ।
भेदः किलैष भवता सकलः स एव
संपत्स्यते शठ तवैव हि दूषणाय ॥ ३ ॥

(इति निष्कांतः)

राजा । आर्य वैहीनरे अतःप्रभृत्यनादृत्य चाणक्यं चंद्रगुप्तः स्वयमेव राज्यं करिष्यतीति गृहीतार्थाः क्रियंतां प्रकृतयः ।

कं० । (आत्मगतम्) कथं निरुपपदमेव चाणक्यमिति नार्यचाणक्यमिति । हंत संगृहीतोऽधिकारः । अथवा न खल्वत्र वस्तुनि देवदोषः । कुतः

स दोषः सचिवस्यैव यदसत्कुरुते नृपः ।
याति यंतुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥ ४ ॥

राजा । आर्य किं विचारयसि ।

कं० । देव न किंचित् । दिष्ट्या देव इदानीं देवः संवृत्तः ।

राजा । (आत्मगतम्) एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः सकामो भवत्वार्यः । (प्रकाशम्) शोणोत्तरे अनेन शुष्ककलहेन शिरोवेदना मां बाधते । शयनगृहमादेशय ।

प्रती० । एतु एतु देवः ।

राजा (आत्मगतम्) ।

आर्याज्ञयैव मम लंघितगौरवस्य
बुद्धिः प्रवेष्टुमिव भूविवरं प्रवृत्ता ।
ये सत्यमेव हि गुरूनतिपातयंति
तेषां कथं नु हृदयं न भिनत्ति लज्जा ॥ ५ ॥

Mudrârâkshasa III.

XIII.

The tale of Mahâshretâ.

Part II.

अथ तांबूलकरंकवाहिनी मदीया तरलिका नाम मयैव सह गता स्नातुमासीत्। सा पश्चाच्चिरादिवागत्य तथावस्थितां शनैर्मामवादीत्। भर्तृदारिके यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता सुरतरुकुसुममंजरी स तस्माद् द्वितीयादात्मनो दत्तदर्शनमतिनिभृतपदः कुसुमितलतागहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्टवान् भर्तृदारिकामुद्दिश्यासीत्। बालिके केयं कन्यका कस्य वापत्यं किमभिधाना क्व वा गच्छतीति। मयोक्तमेषा खलु भगवतः श्वेतभानोरंशुसंभूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य गंधर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गंधर्वाधिवासं हेमकूटमचलवरमभिप्रस्थिता। इति कथिते च मया किमपि चिंतयन्मुहूर्तमिव तूष्णीं स्थित्वा निश्चलनिमेषेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमर्थिनामिव दर्शयन्नुक्तवान्। बालिके कल्याणिनि तथाविसंवादिन्यचपला बालभावेप्याकृतिरियं तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति। ततो मया सविनयमुपरचितांजलिपुटया दर्शितादरमभिहितः। भगवन्कस्मादेवमभिधत्से। काहं महात्मनः। सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयंति किं पुनराज्ञाम्। तद्विस्रब्धमादिश्यतां कर्तव्यमनुगृहीतास्मयं जन इति। एवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्या मामभिनंद्य निकटवर्तिनस्तमालपादपात्पल्लवमादाय निष्पीड्य तटशिलातले तेन गंधगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशादवपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देयेत्य-

मिघायार्पितवान् । इत्युक्त्वा च सा तांबूलभाजनादाकृष्य ता
दर्शयत् । अहं तु तस्याः करतलादादाय वल्कलपट्टिकां तस्यामि
मामभिलिखितामार्यामपश्यम् ।

दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥

ततः सानंदाहं तरलिके कथय कथं स त्वया दृष्टः किं किमभिहि
तासि तेन कियंतं कालमवस्थितासि तत्र कियदनुसरंतस्मान
सायागत इति पुनः पुनः पर्यपृच्छम् । अनयैव च कथया तय
सह तस्मिन्नेव प्रासादे तथैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिव
समत्यवाहयम् ।

अथास्तंगते भगवति रवौ सा छत्रग्राहिणी समागत्याकथ
यत् । भर्तृदारिके तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति कथ
यति चाक्षमालामुपयाचितुमागतोऽस्मीति । अहं तु मुनिकुमार
नामग्रहणादेव स्थानास्थितापि गतेव द्वारदेशं समुपजाततदागम
नाशंका समाहूयान्यतमं कंचुकिनं गच्छ प्रवेश्यतामित्यादिश्य
प्राहिणवम् । अथ मुहूर्तादिव तं तस्यानुरूपं सखायमृषिकुमार
कपिंजलनामानं जराधवलस्य कंचुकिनोऽनुमार्गेणागच्छंतमपश्यम् ।
अंतिकमुपगतस्य चास्य पर्याकुलमिव सविषादमिवाकारमल-
क्षयम् । उत्थाय च कृतप्रमाणा सादरं स्वयमासनमुपाहरम् ।
उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावपमृज्य कौ-
शेयोत्तरीयाञ्चुकपल्लवेनानन्यवधानायां भूमावेव तस्यांतिके समुपावि-
शम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां
मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत् । अहं [illegible] विदिता-
भिप्राया दृष्ट्वैव भगवन्नव्यतिरिक्तेयमस्मच्छरीरादशंकितमभि-
धीयतामित्यवोचम् ।

एवमुक्तस्तु मया कपिंजलः प्रत्यवादीत् । राजपुत्रि किं ब्रवीमि ।
वाचैव मे नाभिधेयविषयमवतरति त्रपया । क कंदमूलफलाशी
शांतो वनवासनिरतो मुनिजनः क चायमशांतजनोचितो विष-

योपभोगाभिलाषकलुषो मन्मथविविधविलाससंकटो रागप्रायः प्रपंचः। सर्वमिदमनुपपन्नमालोक्य किमारब्धं दैवेन। अयत्नेनैव कन्दर्पहासास्पदतामीश्वरो नयति जनम्। न जाने किमिदं वल्कलानां सदृशमुताहो जटानां समुचितं किं तपसोनुरूपमाहोस्विद्धर्मकर्मोपदेशाङ्गमिदम्। अपूर्वेयं विडम्बना। केवलमवश्यकथनीयमिदमपर उपायो न दृश्यतेऽन्या प्रतिक्रिया नोपलभ्यतेऽन्यच्छरणं नालोक्यतेऽन्या गतिर्नास्ति। अकथ्यमाने च महाननर्थोपनिपातो जायते। प्राणपरित्यागेनापि रक्षणीयः सुहृदसव इति कथयामि। अस्ति भवत्याः समक्षमेव च मया तथा निष्ठुरमुपदर्शितकोपेनाभिहितः। तथा चाभिधाय परित्यज्य तं तस्मात्प्रदेशादुपजातमन्युरपरस्मिन्कुसुमापचयोऽन्यं प्रदेशमगमम्। अपयातायां भवत्यां मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति संजातवितर्कः प्रतिनिवृत्य विटपान्तरितविग्रहस्तं प्रदेशं व्यलोकयम्। यावत्तत्र तं नाद्राक्षमासीच्च मे मनस्येवम्। किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन् गतो भवेत्। गतायां च तस्यां लब्धचेतनो लज्जया न शक्नोति मे दर्शनपथमुपगन्तुम्। आहोस्वित्कुपितः परित्यज्य मां गतः। उतान्वेषमाणो मामेव प्रदेशमन्यमितः समाश्रितः स्यादित्येवं विकल्पयन् कंचित्कालमतिष्ठम्। तेन च जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम्। स कदाचिद्धैर्यस्खलनविलक्षः किंचिदनिष्टमपि समाचरेत्। न हि किंचिन्न क्रियते ह्रिया। तत्र युक्तमेनमपहाय कर्तुमित्यवधार्यान्वेषणादरमकरवम्। अन्विष्यमाणश्च यदा यदा नापश्यं तं तदा तदा सुहृत्स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानस्तरुलतागहनानि चंदनवीथिकालतामंडपान्सरःकूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरं व्यचरम्। अथैकस्मिँल्लतागहने कृतावस्थानमुत्सृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तंभितमिवोपरतमिव प्रसुप्तमिव

योगसमाधिस्थमिव मदनमयमिव परायत्तचित्तवृत्तिं पराकोटिमधिरूढं मन्मथावेशस्यानभिज्ञेयपूर्वाकारं तमहमद्राक्षम्।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेनाचिन्तयम्। एवं नामायमतिदुर्विषहवेगो मकरकेतुर्येनानेन क्षणेनायमीदृशमवस्थान्तरमप्रतीकारमुपनीतः। कथमेवमेकपदे स्वर्धीमिवेदं वृथा विधेयो ज्ञानराशिः। अहो बत महच्चित्रं यथा नामायमाशैशवादकलङ्कप्रकृतिरस्खलितवृत्तिर्मम अन्येषां च मुनिकुमारकाणां स्पृहणीयचरित आसीत्। अथ चापरिभूय ज्ञानमविगणय्य तपःप्रभावमुन्मूल्य गाम्भीर्यं मन्मथेन जडीकृतः। सर्वथा दुर्लभं यौवनमस्खलितमित्युपगम्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्यांसदेशावसक्तपाणिस्तमनुन्मीलितलोचनमेव सखे पुण्डरीक कथय किमिदमित्यपृच्छम्। अथ प्रयत्नेन चक्षुरुन्मील्य मन्दया दृशा सुचिरं विलोक्य मामायतनं निःश्वस्य लज्जाविशीर्यमाणविरलाक्षरं सखे कपिञ्जल विदितवृत्तान्तोऽपि किं मां पृच्छसीति शनैः शनैरवदत्। अहं तु तदाकर्ण्य तदवस्थस्याप्रतीकारविकारोऽयं तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति मनस्यवधार्यावदम्।

सखे पुण्डरीक सुविदितमेतन्मम। केवलमिदमेव पृच्छामि यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टमुत धर्मशास्त्रेषु पठितमुत धर्मार्जनोपायोऽयमुतापरस्तपसां प्रकार उत स्वर्गगमनमार्गोऽयमुत व्रतरहस्यमिदमुत मोक्षप्राप्तियुक्तिरुताहोस्विदन्यो नियमप्रकारः। कथमेतदयुक्तं भवतो मनसापि चिन्तयितुं किं पुनराख्यातुमीक्षितुं वा। कथय विमूढ इवानेन मन्मथहतकेनोपहस्यमानमात्मानं नावबुध्यसे। मूढो हि मदनेनायास्यते। का वा सुखाशा साधुजननिन्दितेष्वेवंविधेषु विषयेषु मनसः। स खलु धर्मबुद्ध्या विषलतावनं सिञ्चति कुवलयमालेति निस्त्रिंशलतामालिङ्गति कृष्णागुरुधूमलेखेति कृष्णसर्पम-

यद्गृहीतं महारत्नमिति ज्वलन्तमङ्गारमभिस्पृशति मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः परिणतिविरसेषु सुखबुद्धिमारोपयति। आकलितविषयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वापयसीदं ज्ञानमुह्यसि यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि न नियमयसि वा क्षुभितं मनः। कोऽयमनङ्गो नाम। धैर्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचारः। इत्येवं वदत एव मे वचनमाक्षिप्य प्रतिपदमन्तरालप्रवृत्तबाष्पवेणिकं प्रमृज्य चक्षुः करतलेन पाणौ मामवलम्ब्यावोचत्। सखे किं बहुनोक्तेन। सर्वथा सुस्थोऽस्याशीविषविषवेगविषमाणामेतेषां कुसुमचापसायकानां पतितोऽसि न गोचरे। सुखमुपदिश्यते परस्य। यस्य चेन्द्रियाणि सन्ति मनो वा विद्यते यः पश्यति वा शृणोति वा श्रुतमवधारयति वा यो वा शुभमिदमशुभमिदमिति विवेक्तुमलं स उपदेशमर्हति। मम तु सर्वमेवेदमतिदूरापेतम्। अवष्टम्भो ज्ञानं धैर्यं प्रतिसंख्यानमित्यस्तमिताः कथाः। कथमप्येवमेवापन्निपि धृताहितिष्ठन्त्यसवः। दूरातीतः खलूपदेशकालः। समतिक्रान्तो धैर्यावसरः। गता प्रतिसंख्यानवेला। अतीतो ज्ञानावष्टम्भसमयः। केनचापरेणास्मिन्समये मयैतमपहायोपदेश्यमुन्मार्गप्रवृत्तिनिवारणं वा कर्णार्थं कस्यान्यस्य वा वचसि मया स्थातव्यं को वापरस्त्वत्समो मे जगति बन्धुः। किं करोमि एष शक्नोमि निवारयितुमात्मानम्। इयमनेनैव क्षणेन भवता दृष्टावस्था। तदस्त इदानीमुपदेशकालः। यावत्प्राणिमि तावदस्य कल्पान्तोदितद्वादशदिनकरकिरणातपदीप्तस्य मदनसंतापस्य प्रतिक्रिया क्रियमाणामिच्छामि। पच्यन्त इव मेऽङ्गान्युत्क्वथ्यत इव हृदयं प्लुष्यत इव दृष्टिर्ज्वलतीव शरीरम्। अत्र यत्कालसदृशं तत्करोतु भवानित्यभिधाय तूष्णीमभवत्।

एवमुक्तोऽप्यहमेनं प्राबोधयं पुनः। यदा सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णे तदाहमचिन्तयम्। अतिभूमिमयं गतो न शक्यते निवर्तयितुमितीदानीं निरर्थकः खलूपदेशः।

XIV.

The tale of Mahashveta

Part III.

गतायां च तस्यां रजनिकरमुदितं दृष्ट्वा हृदयेशं संभावयितुं तरलिकया सहोदतिष्ठम्। उच्चलितायां तु मे दुर्निमित्तनिवेदकम् अस्पंदत दक्षिणं लोचनम्। उपजातशंका चाचिंतयमिदमपरं किमप्युपस्थितं दैवेनेति। अथ नातिदूरोऽस्थितेन चंद्रमंडलेनाप्लाव्यमाने ज्योत्स्नया भुवनांतराले तथैव च तया कंठस्थितयाक्षमालया श्रवणशिखरलंबिन्या च पारिजातमंजर्या पद्मरागरत्नरश्मिनिर्मितेनेव रक्तांशुकेन कृतशिरोवगुंठना केनचिदनालोकितेनापि परिजनेनानुपलक्ष्यमाणा तस्मात्प्रासादशिखरादवातरम्।

अवतीर्य च प्रमदवनपक्षद्वारेण निर्गत्य तत्समीपमुदचलम्। तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटाचंद्रोदयस्नुतचंद्रकांतमणिप्रस्रवेण प्रक्षालयंती यस्मिन्प्रदेशे स आस्ते तस्मिन्नेव चास्य सरसः पश्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयम्। दक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशंका तेन सुतरामवदलितेव किमप्यनिष्टमनःकथयंतेव विषण्णेनांतरात्मना तरलिके किमिदमिति ससंभ्रममभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम्।

अतिनिर्दयप्रमाथाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादं विप्रलपंतं कपिंजलमश्रौषम्। हा हतोऽस्मि हा दग्धोऽस्मि हा वंचितोऽस्मि हा किमिदमापतितं किं वृत्तम्। उत्सन्नोऽस्मि। दुरात्मन्मदनपिशाच पाप निर्घृण किमिदमकृत्यमनुष्ठितम्। आः पापे दुश्चरितकारिणि महाश्वेते दुर्विनीते किमनेन तेऽपकृतम्। आः पाप दुश्चरित चंद्रचंडाल कृतार्थोऽसीदानीम्। अपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोरथाः कृतं कर्तव्यं वहेदानीं यथे-

एम् । हा भगवन् श्वेतकेतो पुत्रवत्सल न वेत्सि मुषितमात्मानम् । हा धर्म निष्परिग्रहोऽसि । हा तपो निराश्रयमसि । हा सरस्वति विधवाऽसि । हा सत्य अनाथमसि । [illegible] सुरलोक शून्योऽसि । सखे प्रतिपालय माम् । अहमपि भवन्तमनुयास्यामि । न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी । कथमपरिचित इवाद्यदृष्टपूर्व इवाद्य मामेकपदे उत्सृज्य प्रयासि । कुतस्तवेयमतिनिष्ठुरता । कथय त्वदृते क्व गच्छामि । शून्या मे दिशो जाताः । तदुत्तिष्ठ देहि मे विलपतः प्रतिवचनम् । क्व तन्ममोपरि सुहृत्प्रेम । क्व सा स्मितपूर्वाभिभाषिता ।

एवंविधं विलपितं तं श्रुत्वा दूरादेव मुक्तैकतारआक्रंदा सरस्वतीस्तनतासक्तिवुत्पतमामांशुकोत्तरीया यथाशक्ति त्वरितैरज्ञातसमविषमभूमिमागविषयसैः पादप्रक्षेपैः प्रस्खलन्ती पदे पदे केनाप्युत्क्षिप्यमाणेव तं प्रदेशं गत्वा शशिमणिशिलातले विरचितं शयनमधिशयानं कपिंजलेन मद्वीनाद्व्यमलप्यापिस्पृश्यं हस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कंठे परिष्वक्तं तत्क्षणविगतजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

तद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा काहमगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन्क्षणे किमतिकठिनतयास्य मृदुहृदयस्य किमनेकदुःखसहस्रसहिष्णुतया हतशरीरस्य किं विहिततया दीर्घशोकस्य किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य केन हेतुना नोदक्रामन्ति स्म तदपि न ज्ञातवती । केवलमतिचिरात्प्रत्यक्षचेतना दुःखभागिनी यत्रावनिपतितमसहाशोकदह्यमानमात्मानमपश्यम् । अश्रद्दधाना चासंभावनीयं तन्मरणमात्मनश्च जीवितगुरुत्वात् हा हा किमिदमुपनतमिति मुक्तार्तनादा हा अंब हा तात हा सख्य इति व्याहृ [illegible] रुपिणमात्मस्था । हा नाथ जीवितनिबंधनाबद्ध क्व मा [illegible] दा-

रणामकरुणं विमुच्य यासि । पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था । युगसहस्रायमाणः कृच्छ्रेण नीतो दिवसः । प्रसीदेह्यालप दर्शय भक्तजनवत्सलतामपि विलोकय पूरय मे मनोरथम् । आर्ताऽस्मि भक्ताऽस्म्यनुरक्ताऽस्म्यनाथाऽस्मि । बालाऽस्म्यगतिकाऽस्मि दुःखिताऽस्म्यनन्यशरणाऽस्मि मदनपरिभूताऽस्मि किमिति न करोषि दयां कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां वा नाज्ञायामानूनं कस्मिन्वा त्वदनुकूले नाभिरतं येन कुपितोऽसि । दासीजनमकारणात्परित्यज्य प्रजन् बिभेषि न कौलीनात् । अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया । याहमद्यापि प्राणिमि । हा हताऽस्मि मंदभागिनी । धिङ्मां दुष्कृतकारिणीं यस्याः कृते तवेयमीदृशी दशा वर्तते । नास्ति मत्सदृशी नृशंसहृदया याहमेवंविधं भवन्तमुत्सृज्य गृहं गतवती । किं मे गृहेण किमम्बया किं वा तातेन किं बन्धुभिः किं परिजनेन । हा कमुपयामि शरणम् । अयि दैव निर्घृण दर्शय दयां विज्ञापयामि त्वां देहि दयितदक्षिणाम् । भगवति भवितव्यते कुरु कृपां पाहि वनितामनाथाम् । भगवत्यो वनदेवताः प्रसीदत प्रयच्छतास्य प्राणान् । अंब वसुंधरे सकललोकानुग्रहजननि किमर्थं नानुकंपसे । तात कैलासेश शरणं गताऽस्मि न दर्शय दयालुताम् । इत्येतानि चान्यानि च व्याक्रोशन्ती कियद्वा स्मरामि ग्रहगृहीतेवाविष्टेवोन्मत्तेव भूतोपहतेव व्यलपम् ।

ततश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया तमहं विलप्य तरलिकामब्रवम् । अयुत्तिष्ठ निष्ठुरहृदये किं रोदिषि । काष्ठान्याहृत्य विरचय चितामनुसरामि जीवितेश्वरमिति । अत्रांतरे झटिति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य महाप्राणः पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः दीर्घाभ्यां बाहुभ्यां तमुपरतमुत्क्षिप्य दुंदुभिनादगंभीरेण स्वरेण वत्से महाश्वेते न परित्याज्यास्त्वया प्राणाः पुनरपि अनेन सह भविष्यति समागम इत्यभिधाय

पितेवाभिमुखं सहैवानेन गगनतलमुदपतत्। अहं तु तेन व्यतिकरेण समया सविस्मया सकौतुका चोन्मुखी किमिदमिति कपिञ्जलमपृच्छम्। असौ तु ससंभ्रममदत्त्वैवोत्तरमुदतिष्ठत्। दुरात्मन् क मे वयस्यमपहृत्य गच्छसीत्यभिधावन्सरोषः संजातकोपो बध्नन्नुत्तरीयवल्कलेन परिकरमुत्पतंत तमेवानुसरन्नन्तरिक्षमुदगात्। पश्यन्त्या एव च मे सर्व एव ते तारागणमध्यमविशन्।

मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम्। किंकर्तव्यतामूढा च तरलिकामब्रवम्। अपि जानासि कथय किमेतदिति। सा तु तदवलोक्य स्त्रीस्वभावकातरतया तस्मिन्क्षणे शोकाभिभाविना भयेनाभिभूता वेपमानाङ्गयष्टिरिम मरणशङ्कया च परार्त्या विषण्णहृदया सकरुणमवादीत्। भर्तृदारिके न जानामि पापकारिणी। किं तु महदिदमाश्चर्यममानुषाकृतिरेष पुरुषः। समाश्वासिता चानेन गच्छता सानुकम्पं विलोक्य भर्तृदारिका। प्रायेण चैवंविधा दिव्याः स्वप्नेऽप्यविसंवादिन्यो मधुराकृतयः किमुत साक्षात्। न चाल्पमपि विचारयन्ती कारणमस्य मिथ्याभिधाने पश्यामि। अतो युक्तं विचार्यं गमनमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुम्। अतिमहत्स्वपीदमाश्वासनस्थानमस्यामवस्थायाम्। अपि च तमनुसरन् गत एव कपिञ्जलस्तस्माच्च कुतोऽयं को वायं किमर्थं चानेनायमपगतासुरुत्क्षिप्य नीतः क्व वा नीतः कस्माच्चासंभावनीयेनामुना पुनःसमागमाशाप्रदानेन भर्तृदारिका समाश्वासितेति सर्वमिदमुपलभ्य जीवितं वा मरणं वा समाचरिष्यसि। सुदुर्लभं हि मरणमध्यवसितं पश्चादप्येतद्भविष्यति। न च जीवन्कपिञ्जलो भर्तृदारिकामदृष्ट्वा स्थास्यति। तेन तदागमनकालावधयोऽपि तावद्ध्रियन्तामम्मी प्राणाः। इत्यभिदधाना पादयोर्मे न्यपतत्। अहं तु सकललोकदुर्लभतया जीवितवृष्णायाः क्षुद्रतया

निर्वाणमंगलपदं त्वरया विशंत्या
मुक्ता दयावति दयाऽपि किल त्वयाऽसौ ।
यन्मां न भामिनि निभालयसि प्रभात-
नीलारविंदमदभंगिपदैः कटाक्षैः ॥ ४ ॥
धृत्वा पदस्खलनभीतिवशात्करं मे
या रूढवत्यसि शिलाशकलं विवाहे ।
सा मां विहाय कथमद्य विलासिनि द्या-
मारोहसीति हृदयं शतधा प्रयाति ॥ ५ ॥
निर्दूषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकवितेव मनोभिरामा
रामा कदापि हृदयान्मम नापयाति ॥ ६ ॥
खिन्ना दशाम सकलापि सरोरुहाक्षि-
मिद्राथ विषमगमां सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधि त्वमितो गताऽसि ॥ ७ ॥
सौदामिनीविलसितप्रतिमानकांते
दत्त्वा कियंत्यपि दिनानि महेंद्रभोगान् ।
मंत्रोज्झितस्य नृपतेरिव राज्यलक्ष्मी
र्भाग्यच्युतस्य करतो मम निर्गताऽसि ॥ ८ ॥
केनापि मे विलसितेन समुद्गतस्य
कोपस्य किं नु करभोरु वशंवदाऽभूः ।
यन्मां विहाय सहसैव पतिव्रतापि
यातासि मुक्तिरमणीसदनं विदूरम् ॥ ९ ॥
या तावकीनमधुरस्मितकान्तिकान्ते
भूमंडले विफलतां कविषु व्यतानीत् ।
सा कान्तताऽसि विलयं त्वयि यातवत्यां
राकासुधा वहति वैभवमीश्वरायाः ॥ १० ॥

मंदस्मितेन सुधया परिषिच्य या मां
   नेत्रोत्पलैर्विकसितैरनिशं समीजे ।
सा नित्यमंगलमयी गृहदेवता मे
   कामेश्वरी हृदयतो दयिता न याति ॥ ११ ॥
भूमौ स्थिता रमण नाथ मनोहरेति
   संबोधनैर्यमधिरोपितवत्यसि द्याम् ।
स्वर्गं गता कथमिव क्षिपसि त्वमेण-
   शावाक्षि तं धरणिपृष्ठमु मामिदानीम् ॥ १२ ॥
लावण्यमुज्ज्वलमपास्ततुलं च शीलं
   लोकोत्तरं विनयमर्थमयं नयं च ।
एतान् गुणानशरणानथ मां च हित्वा
   हा हंत सुंदरि कथं त्रिदिवं गतासि ॥ १३ ॥
कांत्या सुवर्णवरया परया च शुद्ध्या
   नित्यं स्वकाः खलु शिखाः परितः क्षिपंतीम् ।
चेतोहरामपि कुशेशयलोचने त्वां
   जानामि कोपकलुषो दहनो ददाह ॥ १४ ॥
कर्पूरवर्तिरिव लोचनतापहंत्री
   फुल्लांबुजस्रगिव कंठसुखैकहेतुः ।
चेतश्चमत्कृतिपदं कवितेव रम्या
   नम्या नरीभिरमरीव हि सा विरेजे ॥ १५ ॥

Bhâminivilâsa III.

XVI

Characteristics of good servants.

एवमादिष्टस्तु मेघनादो व्यजिज्ञपत् । देव राजश्रेष्ठ ... का
कथा भृत्यवर्गोऽपि सकल पदार्थ कंदमूलफलादी भिक्षयं कृत्वा
स्थितो यथास्माकं अभ्यादेशेनापि; देवपादविना न भवेत् रांत-

यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पंडित उच्यते ॥ ५ ॥
यथाशक्ति चिकीर्षंति यथाशक्ति च कुर्वते ।
न किंचिदवमन्यंते नराः पंडितबुद्धयः ॥ ६ ॥
क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टो व्युपयुंक्ते परार्थे तत्प्रज्ञानं प्रथमं पंडितस्य ॥ ७ ॥
नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुम् ।
आपत्सु च न मुह्यंति नराः पंडितबुद्धयः ॥ ८ ॥
निश्चित्य यः प्रक्रमते नांतर्वसति कर्मणः ।
अवंध्यकालो वश्यात्मा स वै पंडित उच्यते ॥ ९ ॥
आर्यकर्मणि रज्यंते भूतिकर्माणि कुर्वते ।
हितं च नाभ्यसूयंति पंडिता भरतर्षभ ॥ १० ॥
न हृष्यत्यात्मसंमाने तप्यते नावमानतः ।
गांगो ह्रद इवाक्षोभ्यो यः स पंडित उच्यते ॥ ११ ॥
तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पंडित उच्यते ॥ १२ ॥
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पंडिताख्यां लभेत सः ॥ १३ ॥
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्याचरति मित्रार्थे यश्च मूढः स उच्यते ॥ १४ ॥
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ १५ ॥
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ १६ ॥
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥ १७ ॥
आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ १८ ॥

अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा।
विचरत्यसमुन्नद्धो यः स पंडित उच्यते ॥ १९ ॥
एकः संपन्नमश्नाति वस्ते वासश्च शोभनम्।
योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ २० ॥
एकः पापानि कुरुते फलं भुंक्ते महाजनः।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ २१ ॥
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ २२ ॥
एकं विषरसो हंति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हंति राजानं मंत्रविप्लवः ॥ २३ ॥
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ २४ ॥
सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम्।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ २५ ॥
क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शांतिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ २६ ॥
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति।
अक्षमावान्परं दोषैरात्मानं चैव योजयेत् ॥ २७ ॥
एको धर्मः परं श्रेयः क्षमैका शांतिरुत्तमा।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ २८ ॥

Mahâbhârata

XVIII.

Characteristics of wise and foolish persons.

Part II.

द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते।
अब्रुवन्परुषं किंचिदसतोऽनर्चयंस्तथा ॥ १ ॥

द्वाविमौ कंटकौ तीक्ष्णौ शरीरपरिशोषिणौ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ २ ॥
न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ॥ ३ ॥
द्वाविमौ पुरुषव्याघ्रौ सूर्यमंडलभेदिनौ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥ ४ ॥
हरणं च परस्वानां परदाराभिमर्शनम्।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ॥ ५ ॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥ ६ ॥
वरप्रदानं राज्यं च पुत्रजन्म च भारत।
शत्रोश्च मोक्षणं कृच्छ्रात्त्रीणि चैकं च तत्समम् ॥ ७ ॥
चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पंडितस्तानि विद्यात्।
अल्पप्रज्ञैः सह मंत्रं न कुर्यान्न दीर्घसूत्रै रभसैश्चारणैश्च ॥ ८ ॥
पंचाग्नयो मनुष्येण परिचर्याः प्रयत्नतः।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ॥ ९ ॥
पंचैव पूजयँल्लोके यशः प्राप्नोति केवलम्।
देवान्पितॄन् मनुष्यांश्च भिक्षूनतिथिपंचमान् ॥ १० ॥
पंचेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम्।
ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ॥ ११ ॥
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तंद्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ १२ ॥
षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ १३ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम्।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ १४ ॥
षडेव तु गुणाः पुंसा न हातव्याः कदाचन।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ १५ ॥

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्॥

षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते।
चोराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः॥ १७॥
प्रमदाः कामयानेषु यजमानेषु याजकाः।
राजा विवदमानेषु नित्यं मूर्खेषु पंडिताः॥ १८॥
षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम्।
आचार्यं शिक्षिताः शिष्याः कृतदाराश्च मातरम्॥ १९॥
नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकम्।
नावं निस्तीर्णकान्तारा आतुराश्च चिकित्सकम्॥ २०॥
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः।
प्रायशो यैर्विनश्यन्ति कृतमूला अपीश्वराः॥ २१॥
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पंचमम्।
महच्च दंडपारुष्यमर्थदूषणमेव च॥ २२॥
अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते॥ २३॥
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति॥ २४॥
नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति।
एतान्दोषान्नरः प्राज्ञो बुध्येद् बुद्ध्वा विसर्जयेत्॥ २५॥

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥ २६॥

नवद्वारमिदं वेश्म त्रिस्थूणं पंचसाक्षिकम्।
क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः॥ २७॥
दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान्।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः॥ २८॥
त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश।
तस्मादेतेषु सर्वेषु न प्रसज्जेत पंडितः॥ २९॥

जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु दधाति दंडम् ।
जानाति मात्रां च तथा क्षमां च तं तादृशं श्रीर्जुषते समग्रा ॥२०॥
सुदुर्बलं नावजानाति कंचिद्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥२१॥
प्राप्यापदं न व्यथते कदाचिदुद्योगमन्विच्छति चाप्रमत्तः ।
दुःखं च काले सहते महात्मा धुरंधरस्तस्य जिताः सपत्नाः ॥२२॥
अनर्थकं विप्रवासं गृहेभ्यः पापैः संधिं परदाराभिमर्शम् ।
दंभं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव ॥२३॥
न वैरमुद्दीपयति प्रशांतं न दर्पमारोहति नास्तमेति ।
न दुर्गतोऽस्मीति करोत्यकार्यं तमार्यशीलं परमाहुरार्याः ॥२४॥
न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः ।
दत्त्वा च पश्चात्कुरुते न तापं स कथ्यते सत्पुरुषार्यशीलः ॥२५॥
समैर्विवाहं कुरुते न हीनैः समैः सख्यं व्यवहारं कथां च ।
गुणैर्विशिष्टांश्च पुरो दधाति विपश्चितस्तस्य नयाः सुनीताः ॥२६॥
चिकीर्षितं विप्रकृतं च यस्य नान्ये जनाः कर्म जानंति किंचित् ।
मंत्रे गुप्ते सम्यगनुष्ठिते च नाल्पोऽस्य च्यवते कश्चिदर्थः ॥२७॥
यः सर्वभूतप्रशमे निविष्टः सत्यो मृदुर्मानकृच्छुद्धभावः ।
अतीव स ज्ञायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः ॥२८॥
य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत ।
अनंततेजाः सुमनाः समाहितः स तेजसा सूर्य इवावभासते ॥२९॥

Mahâbhârata.

XIX.

King Harsha hearing of his father's illness.

अथ कदाचिद् राज्यवर्धनं कवचधरमाहूय हूणान्हंतुं हरिणा-
निव हरिणारिः किशोरमपरिमितबलानुयातं चिरंतनैरमात्यैः
अनुरक्तैश्च महासामंतैः कृत्वा सामिवात्सुत्तरापथं प्राहिणोत्

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥ ६ ॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायां-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ ७ ॥

भिन्ना सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ८ ॥

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ९ ॥

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ १० ॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ११ ॥

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।

साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुंदप्रसवशिथिलं जीवितं धारयेथाः ॥ १२ ॥
कच्चित्सौम्य व्यवसितमिदं बंधुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ १३ ॥
एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान्देशान् जलद विचर प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ १४ ॥

Meghaduta II.

XXI.

A lover's tale

मकरंदः । कथितमवलोकितया मदनोद्यानं गतो माधव इति । भवतु तत्रैव गच्छामि । (परिक्रम्यावलोक्य च) दिष्ट्यायं वयस्य इत एवाभिवर्तते । (निरूप्य) अस्य तु

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात्किमन्यदितोऽथवा ।
भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपंति च धीरताम् ॥ १ ॥

(ततः प्रविशति यथानिर्दिष्टो माधवः)

माधवः । (स्वगतम्)

शशिमुखसुंदरमुख्याः सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्तते मे ।
लज्जां विजित्य विनयं विनिवार्य धैर्य-
मुन्मथ्य मंमथविधेयकमकार्ष एव ॥ २ ॥

माधवः । तया चाहमनुरुध्यमानस्तां बकुलमालामात्मनः
दवतार्य दत्तवान् । असौ पुनरभिनवविस्मया दृशा 3
लोकनविहस्तनया विषमविरचितकमार्गां तामेव बहु मन्य
महानयं प्रसाद इति प्रतिगृहीतवती । अनंतरं च पार्श्व
प्रचलितस्य महतः पौरजनस्य संकुलेन विघटितायां
मागतोऽस्मि ।

Mâlatimâdhav

XXII.

An address to the Ganges.

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीलाजनितजगतः खंडपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौंदर्यं ते सलिलमशिवं नः शमयतु ॥ १ ॥
दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
द्रुतं दूरीकुर्वन् सकृदुपगतो दृष्टिसरणीम् ।
अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह
प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥ २ ॥
स्मृतिं याता पुंसामकृतसुकृतानामपि च या
हरत्यन्तस्तंद्रां तिमिरमिव चंद्रांशुसरणिः ।
इयं सा ते मूर्तिः सकलसुरसंसेव्यसलिला
ममांतःसंतापं त्रिविधमथ तापं च हरताम् ॥ ३ ॥
तवालंबादंब स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।
इदानीमौदास्यं यदि भजसि भागीरथि तदा
निराधारो हा रोदिमि कथय केषामिह पुरः ॥ ४ ॥
अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि तीरं श्रितवताम् ।

सुधातः स्वादीयः सलिलमिदमातृप्ति पिबतां
जनानामानंदः परिहसति निर्वाणपदवीम् ॥ ५ ॥
स्मृतं सद्यः स्वांतं विरचयति शांतं सकृदपि
प्रगीतं यत्पापं झटिति भवतापं च हरति ।
इदं तद्गंगेति श्रवणरमणीयं खलु पदं
मम प्राणप्रांते वदनकमलांतर्विलसतु ॥ ६ ॥
महादानैर्ध्यानैर्बहुविधवितानैरपि च यन्
न लभ्यं घोराभिः सुविमलतपोराशिभिरपि ।
अचिंत्यं तद्विष्णोः पदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय नः ॥ ७ ॥
नृणामीक्षामात्रादपि परिहरंत्या भवभयं
शिवायास्ते मूर्तेः क इह बहुमानं कथयतु ।
अमर्षम्लानायाः परममनुरोधं गिरिभुवो
विहाय श्रीकंठः शिरसि नियतं धारयति याम् ॥ ८ ॥
स्खलंती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रंथौ यदसि विनिबद्धा पुरभिदा ।
अये निर्लोभानामपि मनसि लोभं जनयतां
गुणानामेवायं तव जननि दोषः परिणतः ॥ ९ ॥
जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान्
ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन् ।
निलिंपैर्निर्मुक्तानपि च निरयांतर्निपतितान्
नरानंब त्रातुं त्वमिह परमं भेषजमसि ॥ १० ॥
कृतक्षुद्रैनस्कानथ झटिति संतप्तमनसः
समुद्धर्तुं संति त्रिभुवनतले तीर्थनिवहाः ।
अपि प्रायश्चित्तप्रसरणपथातीतचरिता-
न्नरानूरीकर्तुं त्वमिव जननि त्वं विजयसे ॥ ११ ॥
निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।

समापातं बुद्धेरनु मनु निरोधस्तमनिशं
भियामापातः मः पांडवपु नाशं नय मनुः ॥ १२ ॥

महद्भिः पुण्यौघैर्मनसि मनसा यन्न लभ्यं
निपातः कैवल्यं निखिलजनसाधारणतया ।
यथार्थं ध्यानेन हृदयनिलयानिकेतनानिधे
न कस्याप्युत्कर्षं कथय जननि जाता मे जगनः ॥ १३ ॥

नगेभ्यो यान्तीनां कथय तटिनीनां कतमया
पुराणां संहर्तुः सुरधुनि कपर्दोऽधिरुरुहे ।
कया वा श्रीभर्तुः पदकमलमक्षालि सलिलै-
स्तुलालेशो यस्यां तव जननि दीयेत कविभिः ॥ १४ ॥

विधत्तां निःशङ्कं निरवधि समाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥ १५ ॥

विलीनोऽयं वैवस्वतनगरकोलाहलभरो
गता दूता दूरं क्वचिदपि परेतान्मृगयितुम् ।
विमानानां व्रातो विदलयति वीथीर्दिविषदां
कथा ते कल्याणी यदवधि महीमंडलमगात् ॥ १६ ॥

अपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ
करं कर्णे कुर्वन्त्यपि किल कपालिप्रभृतयः ।
इमं तं मामंब त्वमियमनुकंपार्द्रहृदया
पुनाना सर्वेषामघमथनदर्पं दलयसि ॥ १७ ॥

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं
न याभ्यामालीढा परमरमणीया तव तनुः ।
अयं हि न्यक्कारो जननि मनुजस्य श्रवणयो-
र्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ॥ १८ ॥

विधत्तः नीत्येके नियतमिह लोकार्थघटकाः
  परे पूतात्मानः कति च परलोकप्रणयिनः।
सुखं शेते मातस्तव खलु कृपातः पुनरयं
  जगन्नाथः शश्वत्त्वयि निहितलोकद्वयभरः ॥ १९ ॥
त्वयस्या हि व्रात्याधमपतितपाषण्डपरिषत्-
  परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा।
ममाप्येवं प्रेमा दुरितनिवहेष्वम्ब जगति
  स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः ॥ २० ॥
प्रपद्यन्ते लोकाः कति न भवतीमत्रभवती-
  मुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि।
शपे तुभ्यं मातर्मम तु पुनरात्मा सुरधुनि
  स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ॥ २१ ॥
जनान्मूढांस्तत्तज्जनपदसमासक्तमनसो
  हसन्तः सोल्लासं विकचकुसुमव्रातमिषतः।
पुनानाः सौरभ्यैः सततमलिनो नित्यमलिनान्
  सखायो नः सन्तु त्रिदशतटिनीतीरतरवः ॥ २२ ॥
यजन्त्येके देवान्कठिनतरसेवांस्तदपरे
  वितानव्यासक्ता यमनियमरक्ताः कतिपये।
अहं तु त्वन्नामस्मरणकृतकामस्त्रिपथगे
  जगज्जालं जाने जननि तृणजालेन सदृशम् ॥ २३ ॥
विभूषितानङ्गरिपूत्तमाङ्गा सद्यः कृतानेकजनार्तिभङ्गा।
  मनोहरोत्तुङ्गचलत्तरङ्गा गङ्गा ममाङ्गान्यमलीकरोतु ॥२४॥
इमां पीयूषलहरीं जगन्नाथेन निर्मिताम्।
  यः पठेत्तस्य सर्वत्र जायते सुखसंपदः ॥ २५ ॥

Gangálahari.

XXIII.

God is not open to the charges of injustice and cruelty.

नेश्वरो जगतः कारणमुपपद्यते । कुतः । वैषम्यनैर्घृण्यप्रसंगात् । कांश्चिदत्यन्तसुखभाजः करोति देवादीन् । कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन् । कांश्चिन्मध्यमभोगभाजो मनुष्यादीनिति । एवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत । तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सर्वप्रजोपसंहरणाच्च प्रसज्येत । तस्माद्वैषम्यनैर्घृण्यप्रसंगान्नेश्वरः कारणमित्येवं प्राप्ते ब्रूमः । वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते । कस्मात् । सापेक्षत्वात् । यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च । न तु निरपेक्षस्य निर्मातृत्वमस्ति । सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते । किमपेक्षत इति चेद्धर्माधर्मावपेक्षत इति वदामः । अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः । ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः । यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति । एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति । देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति । एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति ।

Shânkarabhâshya.

XXIV

A poet's introduction to his poem.

श्रीपादैः सुरवंद्यविबुधैर्यैः पदार्थविज्ञानिमानसैरिति ।
नीरोगिणल्पयामरूढैर्दर्पणैः न योऽहमु मूर्धं मामयानुद्धुरः ॥ १ ॥
साहित्यसारोत्सिद्धिधनेनार्थ काव्यामृतं रसन दे काव्यस्य ।
सदस्य दिव्या इव सुरनाथ काव्यार्थवीरः सगुणीमवंति ॥ २ ॥
गृहं तु सर्वे यदि वा यथेष्ट नास्ति रसिकः काचि काव्यस्तनम् ।
रसेषु गुणेषु बहुप्रकाराधिकारापि तथापवत पद गिरः ॥ ३ ॥
रसप्रसरा संतु विशालतरा विदग्धैरजानिमत्ता प्रबंधाः ।
तथापि किंचित्वहरणानुरूपा भक्ता विधास्यामि तथंतसोऽपि ॥ ४ ॥
कुंठप्रमाणानि गुणाः कवीनां साहित्यविद्याधवर्मितेषु ।
दृश्यान्ते विकिसवानो के तानु दुष्काणादस्पृथवानः ॥ ५ ॥
असुत्पन्निरराजितंरीविद्यपि न तं ज्ञनाय बदनं जडानाम् ।
न मोक्तिकच्छिद्रकृति शलाका प्रगल्भते कर्मणि टंकिकायाः ॥ ६ ॥
कथासु ये लब्धरसाः कवीनां ते नानुरज्यंति कथांतरेषु ।
न ग्रंथिपर्णप्रणयाश्चरंति कस्तूरिकागंधमृगास्तृणेषु ॥ ७ ॥
न दुर्जनानामिह कोऽपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः ।
द्वेष्यैव तेषामपि चंद्रसुंदरीकांडुरा पुष्कराणांतरापि ॥ ८ ॥
अलीकि कोऽन्नरसमर्पणेन विदग्धकेन काव्यदूषणानु ।
यथीरसं काव्यसुवर्णमेतद्दोषस्य कठाभरणाल्यमेतु ॥ ९ ॥
किं काव्यादिविलासनृत्या कुर्यात्ति नृपाः कविमंडलस्य ।
किं जानु गुंजाफलभूषणानां सुवर्णकारेण वनेचराणां ॥ १० ॥
पूर्ण्यैरतेः ईर्श न यस्य पार्श्वे काव्यामृतस्वाद पुष्पे [illegible]
नृपा विधेनो न वभूवुरस्या आस्ताने मामाति च [illegible]
हंसावलेः संतु वित्तं यशो यशस्विनिपार्थ [illegible]
न सर्वं यथादिवचः प्रमाणं न [illegible]

गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसंबंधिनीं मूर्धनि धारयन्ति ॥ १३ ॥
कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान्खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥ १४ ॥
प्रयातु चालुक्यनरेन्द्रवंशसमुद्भवानां गुणमौक्तिकानाम् ।
सत्कारसीमा सूत्रनिवेशितानामयं प्रबन्धः कण्ठविभूषणत्वम् ॥ १५ ॥

Vikramànkadevacharita I.

XXV.

The sunset.

अभितापसंपदमथोष्णरुचिर्निजतेजसामसहमान इव ।
पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिमभ्यपतत् ॥ १ ॥
विरलातपच्छविरनुष्णवपुः परितो विपाण्डु दधदभ्रशिरः ।
अभवद्गतः परिणतिं शिथिलः परिमन्दसूर्यनयनो दिवसः ॥ २ ॥
अपराह्णशीतलतरेण शनैरनिलेन लोलितलताङ्गुलये ।
निलयाय शाखिन इवाह्वयते ददुराकुलाः खगकुलानि गिरः ॥ ३ ॥
उपसंध्यमास्त तनु सानुमतः शिखरेषु तत्क्षणमशीतरुचः ।
करजालमस्तसमयेऽपि सतामुचितं खलूच्चतरमेव पदम् ॥ ४ ॥
प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥ ५ ॥
गतवत्यराजत जपाकुसुमस्तबकद्युतौ दिनकरेऽवनतिम् ।
बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिव दिग्वलयम् ॥ ६ ॥
द्रुतशातकुम्भनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि ।
रुरुचे विरिञ्चिनखभिन्नबृहज्जगदण्डकैकतरखण्डमिव ॥ ७ ॥
अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥ ८ ॥

अथ लक्ष्मणानुगतकान्तवपुर्जलधिं विलंघ्य शशिदाशरथिः ।
परिवारितः परित ऋक्षगणैस्तिमिरौघराक्षसकुलं बिभिदे ॥ २२ ॥
रजनीमवाप्य रुचमाप शशी सपदि व्यभूषयदसावपि ताम् ।
अविलंबितक्रममहो महतामितरेतरोपकृतिमच्चरितम् ॥ २३ ॥
दिवसं भृशोष्णरुचिपादहतां रुदतीमिवानवरतालिरुतैः ।
मुहुरामृशन्मृगधरोऽग्रकरैरुदशीश्वसत्कुमुदिनीं वनिताम् ॥ २४ ॥

Shishupálavadha.

XXVI.

Miscellaneous verses.

राज्यं येन पटान्तलग्नतृणवत्त्यक्तं गुरोराज्ञया
पाथेयं परिगृह्य कार्मुकवरं घोरं वनं प्रस्थितः ।
स्वाधीनः शशिमौलिचापविनये प्राप्तो न वै विक्रियां
पायाद्वः स विभीषणाग्रजनिहा रामाभिधानो हरिः
मार्गे प्रयाति विहृतिं [illegible]
स श्रीमान् [illegible] ।
आरब्धं निर्वहति [illegible]
[illegible] ॥ २ ॥
[illegible] हि [illegible] ।
[illegible] ॥ ३ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४ ॥
गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥ ५ ॥

पातितोऽपि कराघातैरुत्पतत्येव कंदुकः ।
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ६ ॥
किं जन्मना च महता पितृपौरुषेण ।
शक्त्या हि याति निजया पुरुषः प्रतिष्ठाम् ।
कुंभा न कूपमपि शोषयितुं समर्थाः
कुंभोद्भवेन मुनिनांबुधिरेव पीतः ॥ ७ ॥
असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो
न संगाद्दौर्जन्यं न हि सुजनता कस्यचिदपि ।
प्ररूढे संसर्गे मणिभुजगयोर्जन्मजनिते
मणिर्नाहेर्दोषान् स्पृशति न हि सर्पो मणिगुणान् ॥ ८ ॥
रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा
निरालंबो मार्गश्चरणरहितः सारथिरपि ।
रविर्यात्यंतं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ ९ ॥
विपक्षः श्रीकंठो जडतनुरमात्यः शशधरो
वसंतः सामंतः कुसुममिषवः सैन्यमबलाः ।
तथापि त्रैलोक्यं जयति मदनो देहरहितः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ १० ॥
ये जाते व्यसने निराकुलधियः संपत्सु नात्युन्नता
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणप्रयोगादपि ।
ह्रीमंतः स्वगुणप्रकाशनविधावन्यस्तुतौ पंडिता-
स्ते भूमंडलमंडनैकतिलकाः संतः कियंतो जनाः ॥ ११ ॥
क्षुद्राः संति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥ १२ ॥
किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष य-
त्किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।

येनाकारि मृणालपत्रमशनं क्रीडा करिण्या सह
यस्तीरं भ्रमणं च कंपनमलं पीतं पयो निर्मलम् ।
सोऽयं वन्यकरी महेषु पतितः पुष्णाति देहं सुनं-
यंद्येन स्त्राडपत्रलिप्सितं मन्दोऽपि ते कः समः ॥ २८ ॥
शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावंध्यैर्वृथा स्थीयते ॥ २९ ॥
अयं मानैकः किं न खलु तुरगः सप्तशिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैव नियतम् ।
कृतांतः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥ ३० ॥
यत्कीर्त्या धवलीकृतं त्रिभुवनं मूर्त्या जगन्मोहितं
सकलेशः परितोषितः सुचरितैरानंदिताः सज्जनाः ।
पूर्णाशा बहवः कृता वितरणयेन त्वया याचका-
स्तस्मै सर्वगुणाश्रयाय भवते दीर्घं युगाशास्महे ॥ ३१ ॥
अर्धं दानववैरिणा गिरिजयाप्यर्धं हरस्याहृतं
देवेत्थं भुवनत्रये स्मरहराभावे समुन्मीलति ।
गंगा सागरमंबरं शशिकला शेषश्च पृथ्वीतलं
सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनम् ॥ ३२ ॥
महाराज श्रीमज्जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं सुरपतिरपि स्वं करिवर
कलानाथ राहुः कमलभवनो हंसमधुना ॥ ३३ ॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च सदा दूरतस्त्वप्रगल्भः ।
क्षांत्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३४ ॥

भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां
सेवासंव्यवहारमर्षविदुषां द्रोहच्युतानामपि ।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्मादप्युपनिन्दितार्थविधिनः सेवा सदा दीक्षिणी ॥ ३५ ॥

परार्थी नृपाणां सेवा कार्यसिद्धयर्थं मतार्थिनः ।
दासमतात्मनो येन मानवांलोऽनुमानिव ॥ ३६ ॥

भूपदीपो घनकेशे प्रजाभ्यः संदर्शयति ।
अंगरक्षगुणैः शुभसंदर्शनं गच्छेन्नास्ति ॥ ३७ ॥

तिष्ठन्ति चरन्तु महत्स्वपि पथिवाजा
रैनाथयानुगुणमयदि नृपेभ्यशरणाम् ।
किं चास्मिविपक्षजनस्नमता विभेना
नं धारयदर्प्यविरलो भुवि नावरिष्याम् ॥ ३८ ॥

एवं भूमिपतिः करोति नाथिव राज्ये प्रमाणं यदा ।
मं साक्षाद्दुपर्दत मद तत च महाहारंयम निर्विघ्ने ।
निर्विण्णस्य पदं करोति हृदयं तस्य स्वनश्वपृहा
स्वार्थेभ्यापतेः न राज्यमथवा प्राणानपि व्यापयेत् ॥३९॥

धर्मार्थं धीलक्ष्मिवस्य लोकानामपि शोभते ।
हुंसः धीताचंतापस्य कृष्णपक्षे विधोरिव ॥ ४० ॥

कोऽर्थान्प्राप्य न गर्वितः विषयिणः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ ४१ ॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः ।
अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ४२ ॥

दोषेनापि सता जनेन विदुषा कालान्तरप्रेप्सुणा
वस्तव्यं खलु वज्रपातविषमे क्षुद्रेऽपि पापे जने ।

घर्मेणाङ्ग वटस्तमध्वगजनः सर्वात्मना सेवते
न छायापि परोपकारकृतये मार्गस्थितस्यापि मे ॥ ५६ ॥
परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः।
न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥ ५७ ॥
न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।
मयूखैर्विश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥ ५८ ॥
आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः
पत्रच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा।
एते तस्मिन्निवृत्ताः पुनरितरककुप्प्रान्तपर्यस्तबिम्बे
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः॥५९॥
अजानन्दाहात्म्यं पततु शलभो दीपदहने
स मीनोऽप्यज्ञानाद् बडिशयुतमश्नातु पिशितम्।
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ ६० ॥
परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलितम्।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे
विमुक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥ ६१ ॥
सत्पूर्वा प्राणानां तुलितमथिनीनीपवनवती
कृतं किं नास्माभिर्विगलितविवेकैर्व्यवसितम्।
यदाश्लिष्यन्तनामेव द्रविणमदमत्तेःस्तमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ६२ ॥
यत्रानन्दाश्च कविहरपि गृहे तत्र शिष्टाश्च एकः
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते।

इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ
  कालः काल्या भुवनफलके क्रीडति प्राणिशारैः ॥ ६३ ॥
भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
  आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् ।
लोला यौवनलालसा तनुभृतामित्याकलय्य द्रुतं
  योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ६४ ॥
नायं ते समयो रहस्यमधुना निद्राति नाथो यदि
  स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ।
चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु-
  र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ ६५ ॥
उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
  सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
  सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ६६ ॥

तृतीयावलिः ।



THIRD SERIES

I

The hare and the lion.

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः । स सर्वदा पशूनां वधं कुर्वन्नास्ते । ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः । मृगेन्द्र किमर्थमेकदा बहुपशुघातः क्रियते । यदि प्रसादो भवति तदा वयमेव भवदाहाराय प्रत्यहमेकैकं पशुमुपढौकयामः । ततः

सिंहेनोक्तम्। यद्येवमभिमतं भवतां तर्हि भवतु तत्।
एकैकं पशुमुपकल्पितं भक्षयन्नास्ते। अथ कदाचिद् वृद्धशशकस्य
वारः समायातः। सोऽचिन्तयत्। यद्यहं पञ्चत्वं गमिष्यामि तर्हि
किं मे सिंहानुनयेन। तन्मन्दं मन्दं गच्छामि। ततः सिंहोऽपि
क्षुधापीडितः कोपात्तमुवाच। कुतस्त्वं विलम्ब्य समागतोऽसि।
शशकोऽब्रवीत् देव नाहमपराधी। आगच्छन्पथि सिंहान्तरेण
बलाद्धृतः। तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवे-
दयितुमत्रागतोऽस्मि। सिंहः सकोपमाह। सत्वरं गत्वा दुरात्मानं
दर्शय क्व स दुरात्मा तिष्ठति। ततः शशकस्तं गृहीत्वा गभीरकूपं
दर्शयितुं गतः। तत्रागत्य स्वयमेव पश्यतु स्वामीत्युक्त्वा
तस्मिन्कूपजले तस्य सिंहस्यैव प्रतिबिम्बं दर्शितवान्। ततोऽसौ
क्रोधाध्मातो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः। अतोऽहं
ब्रवीमि।

> बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
> पश्य सिंहो मदोन्मत्तः शशकेन निपातितः॥ १॥

Hitopadesha II.

II

The crane and the crab

अस्ति कस्मिंश्चित्प्रदेशे नानाजलचरसनाथं सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान्व्यापादयितुमसमर्थः। ततश्च क्षुत्क्षामकण्ठः सरस्तीर उपविष्टो मुक्ताफलसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन्रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे। माम किमद्य त्वयाहारवृत्तिर्नानुष्ठीयते। केवलमश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते। स आह। वत्स सत्यमुपलक्षितं भवता। मया हि

मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि । कुलीरकस्तत् श्रुत्वा प्राह । किं तद्वैराग्यकारणम् । स प्राह । वत्स अहमस्मिन्सरसि जातो वृद्धिं गतश्च । तन्मयैतच्छ्रुतं यद् द्वादशवार्षिक्यनावृष्टिः संपद्यते लग्ना । कुलीरक आह । कस्मात्तत् श्रुतम् । बक आह । दैवज्ञमुखात् । यतः शनैश्चरो रोहिणीशकटं भित्त्वा भौमशुक्रौ प्रयास्यति । तदेतत्सरः स्वल्पतोयं वर्तते शीघ्रं शोषं यास्यति । अस्मिन् शुष्के यैः सहाहं वृद्धिं गतः सदैव क्रीडितश्च ते सर्वे तोयाभावान्नाशं यास्यन्ति । तदेषां वियोगं द्रष्टुमहमसमर्थः । तेनैतत्प्रायोपवेशनं कृतम् । सांप्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनैर्नीयन्ते । केचिच्च मकरगोधाशिशुमारजलहस्तिप्रभृतय स्वयमेव गच्छन्ति । अत्र पुन सरसि ये जलचरास्ते निश्चिन्ताः सन्ति । तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति । ततः स तदाकर्ण्यान्येषामपि जलचराणां तत्तस्य वचनं निवेदयामास । अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमभ्युपेत्य पप्रच्छुः । माम अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति । बक आह । अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः पद्मिनीखण्डमण्डितं यच्चतुर्विंशत्यापि वर्षाणामवृष्ट्या न शोषमेति । तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि । अथ ते तत्र विश्वासमापन्नास्तात मातुल भ्रातरिति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात्परि तस्थुः । सोऽपि दुष्टाशयः क्रमेण तान्पृष्ठमारोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्तासंदेशकैर्मनांसि रञ्जयन्नित्यमेवाहारवृत्तिमकरोत् । अन्यस्मिन्दिने स कुलीरकेणोक्तः । माम मया सह ते प्रथमः स्नेहसंभाषः संजातः । तत्किं मां परित्यज्यान्यान्नयसि । तस्मादद्य मे प्राणत्राणं कुरु । तदा-

सन्ततमासीत् । चिन्त्यनपत्य. । तस्मात्सोऽपत्योत्पादनार्थं तीव्रं निय-
ममास्थाय सावित्रीं देवतामाराधयामास । अथ कस्मिंश्चित्काले
गते तस्य ज्येष्ठा महिषी गर्भमादधे । प्राप्ते काले चैकां कन्यां
सुषुवे । सा सावित्र्या प्रीतया दत्तेति पिता विज्ञाय तस्याः सावि-
त्रीत्येव नाम चक्रे । सा नृपात्मजा विग्रहवती श्रीरिव वर्धमाना
गच्छता कालेन यौवनस्था बभूव । तां कांचनीं प्रतिमामिव
तेजसा ज्वलन्तीं दृष्ट्वा सर्वे जना देवकन्येव प्राप्तेति मेनिरे ।
तस्यास्तेजसा प्रतिहतचित्तः न कोऽपि तां वरयामास । तां
यौवनस्थामपि नृपतिभिरप्रार्थ्यमानां दृष्ट्वा पिता परमदुःखि-
तोऽभवत् । तामाहूयोवाच च । पुत्रि प्रदानकालस्तेऽयम् । न च
कश्चित्त्वां वृणोति । तस्मात् गुणैरात्मनः सदृशं भर्तारं स्वयम-
न्विष्येति । सा तथेति पितुर्वचनमादाय अभिवन्द्य हेमरथमा-
रुह्य राजर्षीणां तपोवनानि जगाम सर्वाणि तीर्थान्याश्रमांश्चा-
भिगम्य पितुर्वेश्म निववृते । तदा स सभामध्ये भगवता नारदेन
सह कथाप्रसंगेनोपविष्ट आसीत् । तां तथागतां दृष्ट्वा नारदोऽ-
श्वपतिं पप्रच्छ । क्व गतेयं सुता कुतश्चागता किमर्थं च
त्वमिमां भर्त्रे नाद्यापि प्रयच्छसीति । अश्वपतिः प्रोवाच । इयं
मद्वचनेनैव कार्येण प्रेषिताद्यागता यो भर्तानया वृतस्तं भगवान्
श्रोतुमर्हति । इत्युक्त्वा विस्तरेण वृत्तान्तं कन्यामादिदेश । यथामा-
दिष्टा सा प्रत्युवाच । आसीच्छाल्वेषु द्युमत्सेनो नाम पृथिवीपतिः
[redacted] कालेनान्धो बभूव । विनष्टचक्षुषो बालपुत्रस्य तस्य राज्यं पूर्व-
वैरिणा छिद्रेऽस्मिन् हृतम् । ततोऽसौ महारण्ये प्रविश्य तपोवनं
च गत्वा तपस्तेपे । तस्य तत्र पुत्रस्तपोवने संवृद्धः सत्यवाननु-
रूपो मे भर्तेति मनसा वृत इति । नारदस्तु तद्वचः श्रुत्वा प्राह ।
बत महत्पापं सावित्र्या कृतं यदनया गुणवानपि सत्यवान्वृतः ।
अश्वपतिः प्राह । भगवन् किं तत्पापम् । नारदः प्रत्युवाच । असौ
सर्वगुणोपेतः । किं तु गुणानामन्यतमः एतस्य दोषस्तिष्ठति ।

स च प्रयत्नेनापि नातिवर्तितुं शक्यम् । दोषस्त्वयमेव यदद्य प्रभृति संवत्सरेणायं क्षीणायुर्भूत्वा देहन्यासं करिष्यतीति । नारदस्य वचः श्रुत्वाऽश्वपतिः सावित्रीमाह । गच्छ त्वमन्यं वरय पनः सत्यवति महानयं दोषः । सावित्री प्राह । सकृन्निपतति सकृत्कन्या प्रदीयते । सकृदाह ददानीति त्रीण्येतानि सकृत्सताम् ॥ ततो दीर्घायुरल्पायुर्वा सगुणो निर्गुणो वा सकृन्मया भर्ता वृतो नाहमधुना द्वितीयं वृणोमीति । तद् श्रुत्वा नारदः प्रोवाच । अश्वपते तव दुहितुः स्थिरैव बुद्धिः । तस्मात्त्वयैतस्याः प्रदानमेव मे रोचते । एवमुक्त्वा नारदस्त्रिदिवं गतः । राजापि दुहितुः सर्वं वैवाहिकं कार्यं कृत्वा द्युमत्सेनाश्रमं कन्यां द्विजैश्च सार्धं पद्भ्यामेव जगाम । गत्वा च सावित्रीं मे कन्यां स्नुषार्थं गृहाणेति द्युमत्सेनमुवाच । द्युमत्सेन आह । वयं राज्यात् च्युता वनवासमाश्रितास्तपस्विनो भूत्वा धर्मं चरामः । कथं नामेयं तव सुता वनवासमसुखं सहिष्यते । किं तु पूर्वमेवाश्वपतिनानुनीयमानो द्युमत्सेनस्तत्प्रस्तावमङ्गीचकार । ततोऽखिलानाश्रमवासिनो द्विजानाहूय नृपौ तौ यथाविधि समुद्वाहं कारयामासतु. । अश्वपतिः कन्यां यथार्हं परिच्छदं च दत्त्वा परमया मुदा युक्तः स्वभवनं ययौ । सत्यवानपि तां सर्वगुणान्वितां भार्यां लब्ध्वा मुमुदे । सापि मनोऽभिमतं भर्तारं प्राप्य परं तोषमनुबभूव । गते पितरि सा सर्वाण्याभरणानि संन्यस्य वल्कलानि काषायं वस्त्रं च जगृहे । शुश्रूषानम्रतया च न केवलं सर्वेषामपि तुष्टिमावहत् । एवं तत्र तया नियमना बहुतिथे काले व्यतीते यदा सत्यवतो मरणस्य स कालः उपस्थितः । भाविनी सावित्री नारदोक्तान् दिवसान् गणयित्वा चतुर्थेऽहनि सत्यवता मर्तव्यमिति संचिन्त्य त्रिरात्रं व्रतमुद्दिश्य दिवारात्रं स्थिताभवत् । तस्या व्रतधारणनिश्चयं श्रुत्वा द्युमत्सेनस्तस्यास्तां व्यावर्तयितुमियेष । किं तु सावित्र्युवाच । तात न संतापः कार्यः । अहं व्रत

पारयिष्यामि । त्वत्प्रसादादन्ते इदं व्यवसायस्य कारणमिति । एव-
मुक्तः श्वशुरस्तामनुजज्ञे । अथ भर्तृमरणदिवसे प्राप्ते प्रातरुत्थाय
हुताशं हुत्वा सर्वान् द्विजान् वृद्धान् श्वश्रूं श्वशुरं चाभिवाद्य
सर्वेषामप्यवैधव्याशिषः प्रत्यग्रहीत् । अनन्तरं द्युमत्सेनस्तामाह ।
त्वया यथोद्दिष्टं व्रतं पारितमधुनाहारकालः सम्प्राप्तः । सावित्र्यो-
क्तम् । अस्तं गत आदित्ये भोजनमिति मे सङ्कल्पः । एवं संभा-
षमाणायां सावित्र्यां सत्यवान्स्कन्धे परशुमादाय काष्ठान्याहर्तुं
वनं प्रस्थितः । तं च सावित्र्यनुगन्तुकामा तेन निषिध्यमानापि
धैर्यस्थाऽभूत् । ततः सत्यवानाह । यदि ते गमनोत्साहस्तव
प्रियं करिष्यामि । किं तु मम गुरूनामन्त्रयस्व मा त्वामयं दोषः
स्पृशेत् । एवमुक्ता सा श्वश्रूं श्वशुरं च गत्वोवाच । आर्यपुत्रेण
याम्यनुज्ञातानेन सह वनं गन्तुमिच्छामि । कुसुमितं वनं द्रष्टुं परं
हि मे कौतूहलमिति । ततोऽनुज्ञां लब्ध्वा भर्त्रा सह सा वनं प्रतस्थे ।

Mahâbhârata.

IV.

The tale of Savitri.

Part II.

तौ दंपती विचित्राणि वनानि पुण्यवहा नदीः पुष्पितांश्च नगो-
त्तमान् दृष्ट्वा परां मुदमवापतुः । अथ सत्यवान्फलान्यादाय
काष्ठानि पाटयामास । तच्छ्रमणात्तस्य शिरसि वेदना जज्ञे । अतः
स प्रियामभिगम्याह । अस्वस्थमिवात्मानं लक्षये । तत्स्वप्तुमि-
च्छामि न मे स्थातुं शक्तिरिति । पतिवाक्यपरायणा सा स्वो-
त्सङ्गेऽस्य शिरः कृत्वा भूतले निषसाद । अथ सा मुहूर्तादेव
रक्तवाससं बद्धमौलिमादित्यसमतेजसं श्यामावदातं रक्ताक्षं
पाशहस्तं भयावहं पुरुषं सत्यवतः पार्श्वे स्थितमपश्यत् । तं तथा-
विधमवलोक्य सावित्री प्राह । दैवतं त्वाम मि । वपुरे-

[illegible] । [illegible] किं निवर्तसे [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] ।

सावित्र्युवाच ।

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मयापि तत्र गन्तव्यमेष धर्मः सनातनः ।
प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥

नात्मवन्तो हि वने चरन्ति धर्मं च वासं च परिश्रमं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥

यम उवाच

निवर्त तुष्टोऽस्मि तवानया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं ददानि ते सर्वमनिन्दिते वरम् ॥

सावित्र्युवाच ।

च्युतः स्वराज्याद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ॥

यम उवाच ।

ददानि ते सर्वमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वना ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ॥

सावित्र्युवाच ।

कुतः श्रमो भर्तृसमीपतो हि मे यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ॥

सतां सकृत्संगतमीप्सितं परं ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण संगतं ततः सतां संनिवसेत्समागमे ॥

यम उवाच ।

मनोनुकूलं बुधबुद्धिवर्धनं त्वयैवमुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं वरं द्वितीयं वरयस्व भामिनि ॥

सावित्र्युवाच ।

हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं लभतां स पार्थिवः ।
न च स्वधर्मं प्रजह्यातु मे गुरुर्द्वितीयमेतद्वरयामि ते वरम् ॥

यम उवाच ।

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरान्न च स्वधर्मात्परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व न ते श्रमो भवेत् ॥

सावित्र्युवाच ।

प्रजास्त्वयैता नियमेन संयता नियम्य चैता नयसे निकामया ।
अतो यमत्वं तव देव विश्रुतं निबोध चेमां गिरमीरितां मया ॥

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्म सनातनः ॥

यम उवाच ।

पिपासितस्येव भवेद्यथा पयस्तथा त्वया वाक्यमिदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं वरं वृणीष्वेह शुभे यदिच्छसि ॥

सावित्र्युवाच ।

ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम् ।
कुलस्य संतानकरं च यद्भवेत्तृतीयमेतं वरयामि ते वरम् ॥

यम उवाच ।

कुलस्य संतानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥

सावित्र्युवाच ।

न दूरमेतन्मम भर्तृसन्निधौ मनो हि मे दूरतरं प्रधावति।
अथ प्रजन्नेव गिरं समुद्यतां मयोच्यमानां शृणु भूय एव च॥
विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः।
समेन धर्मेण च रञ्जिताः प्रजास्ततस्तवेहेश्वर धर्मराजता॥

आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति॥

यम उवाच ।

उदाहृतं ते वचनं यदङ्गने शुभे न तादृक् त्वदृते मया श्रुतम्।
अनेन तुष्टोऽस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च॥

सावित्र्युवाच ।

ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत् कुलोद्वहम्।
शतं सुतानां बलवीर्यशालिनामिमं चतुर्थं वरयामि ते वरम्॥

यम उवाच ।

शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले।
परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता॥

सावित्र्युवाच ।

सतां सदा शाश्वतधर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ते।
सतां सद्भिर्नाफलः सङ्गमोऽस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः॥

आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम्।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम्॥

यम उवाच ।

यथा यथा भाषसि धर्मसंहितं मनोनुकूलं सुपदं महार्थवत्।
तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते॥

सावित्र्युदाय ।

न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं न भर्तृहीना व्यवसामि जीवितुम् ॥
वरातिसर्गः शतपुत्रता मम त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं तथैव सत्यं वचनं भविष्यति ॥

यमस्तथेत्युक्त्वा पाशं मुक्त्वा च सावित्रीमाह । हे कुलनन्दिनि एष ते भर्ता मया मुक्तः । स त्वया सार्धं चतुर्वर्षशतायुरवाप्स्यति । इत्युक्त्वा यमः स्वलोकं ययौ । अथ तस्मिन् सावित्रीवायसमस्तदर्पमसलितस्थापवानावत्वनि तावस्य लब्धसंज्ञो भूत्वा प्रोवाच चिरं सुप्तोऽहं क्वासौ श्यामः पुरुषो यो मामाकर्षत् प्रत्युवाचाऽहं धीरे तमो महान्तं पुरुषं यापयन् विस्मय स्वप्न उत सत्यमिति तो क्षोभत्व पप्रच्छ । सावित्री प्रत्युवाच । अधुना रजनी व्यगाहत अस्ते सर्वमाख्यास्यामि । संप्रति पितरौ विषादवन्तौ नगरंगतौ मृगाभिमुखिन्यावासति । तथापि नेत्रविरोधाने तत्र इमां अपावर्तयोगिन्या भंगं गृहं यास्याव इति । सत्यवानाह । दिवापि मयि गिरिस्ते मम गुरू सतप्येते । मदर्थं नगरस्य कारणमेति न जाने । माता वृद्धा पिता चान्धस्तयोरहं यष्टिः किल । अतः पित्रोः सकाशे गमनमेव वरमिति सावित्रीयुक्त्या त्वरायुक्तया पतिव्रतया सहाश्रमं प्रापत् । एतस्मिन्नेव काले द्युमत्सेनो लब्धचक्षुः प्रसन्नया दृष्ट्या सर्वं ददर्श । पुत्रमनागतं विलोक्य पितरौ परमार्तौ गत्वाश्रमाश्रमान् सर्वाणि वनानि च विचिन्वन्तौ परं परिश्रममगमताम् । पुत्रस्य बाल्यवृत्तानि तानि तानि स्मृत्वा शोकाकर्षितौ अपरस्त्वाश्रमवासिभिर्मुनिभिः परिसान्त्वितौ । तस्मिन्नेव क्षणे भर्त्रा सह सावित्र्याश्रमं प्रविवेश । तावुभौ कुमारौ दृष्ट्वा सर्वे ते परमानन्दमवापुः । द्युमत्सेनं लब्धचक्षुषं दृष्ट्वा ऋषयः सावित्रीमस्य कारणं त्वं खलु विजानासि यदि न रहस्यं तर्हि निवेद्यतामित्यूचुः । सा प्रत्युवाच । पूर्वं नारदमहर्षिणा कथितो मम भर्तु-

मृत्युरागत इति चिन्तयित्वा तेनैव सहाहं वनमगच्छम्। तत्र च परिश्रमात्सुप्तमिमं यमो दक्षिणामाशां निनाय। अहं तु तमेवानुसरन्ती स्तुतिभिराराध्य प्रसादयम्। ततस्तुष्टेन तेन मह्यं पंच वराः दत्ताः। तेषामेकतमेन मे श्वशुरो लब्धचक्षुर्जातः स्वराज्यं चिरात्प्राप्स्यत्येव। इत्युक्त्वान्येषामपि चतुर्णां वराणां स्वरूपं कथयित्वा विरराम। तन्निशम्य ऋषय ऊचुः। साध्वि व्यसनार्णवनिमग्नं तमोमये ह्रदे निमज्जमानं नरेन्द्रस्य कुलं सुशीलव्रतपुण्यया कुलीनया त्वयाद्य समुद्धृतम्। इति तामभिनंद्य सर्वे ते ऋषयो मुदिताः स्वमालयं जग्मुः। तस्यां रात्र्यां व्यतीतायां शाल्वेभ्यः प्रकृतय आगत्य द्युमत्सेनमाहुः। राजन्निमान्यानि यानानि चतुरंगं बलं च सिद्धमनोऽधुना नगरं यास्यामो येन भवान्राज्येऽभिषिच्येतेति। द्युमत्सेनोऽपि तथा सावित्र्या सुतेन चानुगतो नगरं प्रत्य सिंहासनमारूढः। सत्यवानपि यौवराज्येऽभिषिक्तः। अथ गच्छता कालेन सावित्री पुत्रशतं सुषुवे। तस्याः पितापि पुत्रशतं प्राप। एवमात्मा माता पिता श्वश्रूः श्वशुरो भर्तुः कुलमेव सकलं सावित्र्या दुःखात्समुद्धृतम्।

Mahâbhârata.

V

Know thyself

मूढ जहीहि धनागमतृष्णां कुरु तनुबुद्धे मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम्॥ १॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः॥ २॥
का तव कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः॥ ३॥

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं प्रविशाशु विदित्वा ॥ ४ ॥
नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याधिव्यालग्रस्तं लोकं शोकहतं च समस्तम् ॥ ५ ॥
तत्त्वं चिन्तय सततं चित्ते परिहर चिन्तां नश्वरवित्ते ।
क्षणमिह सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका ॥ ६ ॥
यावद्वित्तोपार्जनशक्तस्तावन्निजपरिवारो रक्तः ।
तदनु च जरया जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥ ७ ॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्य हि कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ८ ॥
सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ९ ॥
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि कोऽपि न लग्नः ॥ १० ॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ ११ ॥
यावज्जननं तावन्मरणं तावज्जननीजठरे शयनम् ।
इति संसारे स्फुटतरदोषः कथमिह मानव तव सन्तोषः ॥ १२ ॥
दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १३ ॥
अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
करधृतकम्पितशोभितदण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ १४ ॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वं पश्यात्मन्यात्मानं सर्वत्रोत्सृज भेदज्ञानम् ॥ १५ ॥

Mohamudgara.

गौतमी। नूनं ते शक्रावताराभ्यंतरे शचीतीर्थसलिलं वंदमानायाः प्रभ्रष्टमंगुलीयकम्।

राजा (सस्मितम्) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

शकुं०। अत्र तावद्विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि।

राजा। श्रोतव्यमिदानीं संवृत्तम्।

Shâkuntala V.

VII.

Repudiation of Shakuntalâ by Dushyanta.

Part II.

शकुंतला। नन्वेकदिवसे नवमालिकामंडपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत्।

राजा। शृणुमस्तावत्।

शकुं०। तत्क्षणे स मे पुत्रकृतको दीर्घापांगो नाम मृगपोतक उपस्थितः। त्वयायं तावत्प्रथमं पिबत्वित्यनुकंपिनोपच्छंदित उदकेन। न पुनस्तेऽपरिचयाद्धस्ताभ्याशमुपगतः। पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितोऽसि। सर्वः सगंधेषु विश्वसिति द्वावप्यत्रारण्यकाविति।

राजा। एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिराकृष्यंते विषयिणः।

गौतमी। महाभाग नार्हस्येवं मंत्रयितुम्। तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य।

राजा। तापसवृद्धे

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागंतरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयंति ॥ १ ॥

सतिसुखमनुभवंति । तथा हीह विकचोत्पलवनरचनानुकारिषु स्ततयावचंद्रकशतं हरिणलोचनद्युतिशबलमभिनवशाद्वलं विशति शिखिनः कलापमातपाहतो निर्व्याकुलमहिः । अयमनुजु मातरमजातकेसरः केसरिशिशुभिः सहोपजातपरिचयः प्रसृतक्षीरधारमापिबति कुरंगशावकः सिंहीस्तनम् । एष मृणालकलाशंकिभिः शशिकरधवलं सटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः । इदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि । एते च न निवारयंति मदांधा अपि गंडस्थलीभाजं मदजलपानानिश्चलानि मधुकरकुलानि जातदयाः कर्णतालैः करिणः । किं बहुना । फलमूलवल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इवालक्ष्यंते अस्य भगवतः । किं पुनः सचेतनाः प्राणिनः ।

Kâdambari.

X

Siva disguised as an ascetic to test Pârvatî's love.

अथाजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥ १ ॥
तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ।
भवंति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३ ॥
अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥
अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबंधि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दंतवाससा ॥ ५ ॥
अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ।

य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ६ ॥
यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥ ७ ॥
विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥ ८ ॥
प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतः सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥ ९ ॥
अतोऽत्र किंचिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ १० ॥
कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात्किमतः परं वद ॥ ११ ॥
भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि त्वयि ॥ १२ ॥
अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥ १३ ॥
किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥ १४ ॥
दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥१५
निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम्॥१६
अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ॥ १७ ॥
मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते॥१८
अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः॥१९
कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचितं तपः ।

XII.

The course of the cloud-messenger from BrahmAvarta to KailAsa.

ब्रह्मावर्तं जनपदमथ छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ १ ॥

हित्वा हालामभिमतरसां रेवतीलोचनांकां
बंधुप्रीत्या समरविमुखो लांगली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मंतःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ २ ॥

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ३ ॥

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलंबी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगंभः ।
संसर्पन्त्या सपदि भवतः स्रोतसि छाययासौ
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥ ४ ॥

आसीनानां सुरभितशिलं नाभिगंधैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृंगे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयाम् ॥ ५ ॥

तं चेद्वायौ सरति सरलस्कंधसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ६ ॥

ये संरंभोत्पतनरभसा स्वांगभंगाय तस्मि-
न्मुक्ताध्वानं सपदि शरभा लंघयेयुर्भवंतम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारंभयत्नाः ॥ ७ ॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेंदुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
संकल्पंते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ८ ॥

शब्दायंते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कंदरेषु ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ९ ॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौंचरंध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥ १० ॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृंगोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यंबकस्याट्टहासः ॥ ११ ॥

हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी ।
भंगीभक्त्या विरचितवपुः स्तंभितांतर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ १२ ॥

हेमांभोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य ।

धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलदललितैर्निर्विशस्तं नगेन्द्रम् ॥ १३ ॥

Meghaduta

XIII

Kapinjala's account of himself after Pundarika's death.

श्रूयतां गंधर्वराजपुत्रि । तदा कृतार्तप्रलापामपि त्वामेकाकिनीमुत्सृज्य तस्य महापुरुषस्योपरि कोपः क्व मे प्रियसुहृदमपहृत्य गच्छसीत्यभिधाय पुरुषं तमनुबध्नन् जवेनोदपतम् । स तु मे प्रतिवचनमदत्त्वैव गीर्वाणवर्त्मनि विस्मयोत्फुल्लनयनैरालोक्यमानो देवानिकैरप्सरसः कुमुदाकारं तारकागणमतिक्रम्य चंद्राभिराममकल्लोलं चंद्रलोकमगमत् । तत्र च महोदयाख्यायां सभायामिंदुकांतमये महति पर्यंके तत्पुंडरीकशरीरं स्थापयित्वा मामवादीत् कपिंजल जानीहि मां चंद्रमसम् । अहं ह्यनेन जगदनुग्रहाय स्वव्यापारमनुतिष्ठन्ननेन ते प्रियवयस्येन च मापरोषाज्जीवितात् सु-दृश्यमाना निरपराधः संशप्तः । दुरात्मन्निन्दुहतक यथाहं त्वया करैः संतापित उत्पन्नानुरागोऽप्राप्तहृदयवल्लभासमागमसुखः प्राणैर्वियोजितस्तथा त्वमपि कर्मभूमिभूतेऽस्मिन्भारते वर्षे जन्मनि जन्मन्येवमेव प्राप्तानुरागोऽप्राप्तसमागमसुखस्तीव्रतमां हृदयवेदनामनुभूय जीवितमुत्स्रक्ष्यसीति । अहं तु तेनास्य शापहतमुखाप्रगिन्युद्दीपित इव निराशः किमनेनागमदोषानुबंधेन निर्विवेकबुद्धिना शप्तोऽस्मीत्युत्पन्नकोपस्त्वमपि मत्तुल्यदुःख एव भविष्यसीति प्रतिशापमस्मै प्रादत्तम् । अपगतामर्षश्च विवेकमागत्य बुद्ध्या विमृश्य महाश्वेताव्यतिकरमस्याभिमतपात्रमिव । यस्मात् महाश्वेता मन्मयूखसंभवादप्सरसः कुलादुत्पन्ना स्मर्यते गौर्यां

मुपयास्यसीति । अहं तु तद्वचनानंतरमेवाधःस्थिते महोदधौ न्यपतम् । तस्माच्च तुरंगीभूयोद्गमम् । संज्ञा तु मे तुरंगत्वेऽपि नैवापयाता येनाहं मयास्यैवापराधस्य कृते किन्नरमिथुनानुसारी इ मिमेतामानीतः । तदेव चंद्रमसोऽवतारश्चंद्रापीडः । योऽप्यसौ प्र कनादेवानुरागसंस्कारादभिलषंस्त्वयाजानता शापाग्निना निर्द ग्धः सोऽपि मे वयस्यस्य पुंडरीकस्यावतार इति ।

Kâdambari.

XIV.

The omnipresent form of Vishnu.

श्रीभगवानुवाच ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ १ ॥
पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ २ ॥
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥ ३ ॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ४ ॥

संजय उवाच

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ५ ॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ ६ ॥
दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् ।
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखम् ॥ ७ ॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ८ ॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ९ ॥
ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १० ॥

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ ११ ॥
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १२ ॥
किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १३ ॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १४ ॥
अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १५ ॥
द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ १६ ॥
अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः
रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ १८ ॥
रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ १९ ॥
नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २० ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥
अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥
यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥
यथा प्रदीप्तं ज्वलनं पतंगा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥
लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥
आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

Bhagavadgitâ XI.

XV.

Râma abandoning Sitâ.

रामः । कथं प्रियवचना मे वक्षसि प्रसुप्तैव । (निर्वर्ण्य सस्नेहम्)
इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ १ ॥

प्रतीहारी । (प्रविश्य) देव उपस्थितः ।

रामः । अये कः ।

प्रतीहारी । आसन्नपरिचारको देवस्य दुर्मुखः ।

रामः । (स्वगतम्) शुद्धान्तचारी दुर्मुखः । स मया पौर-
जानपदानपसर्पितुं प्रयुक्तः । (प्रकाशम्) आगच्छतु ।
(प्रतीहारी निष्क्रान्ता)

दुर्मुखः । (प्रविश्य) (स्वगतम्) हा कथं सीतादेव्या ईदृश-
मचिन्तनीयं जनापवादं देवस्य कथयिष्यामि । अथवा नियोगः
खल्वीदृशो मन्दभाग्यस्य ।

(सीता उत्स्वप्नायते हा आर्यपुत्र)

रामः । अये ईदृशं रणरणकदायिनी चित्रदर्शनाद्विरहभा-
वना देव्याः स्वप्नोद्वेगं करोति ।

दुर्मुखः । (उपसृत्य) जयतु जयतु देवः ।

रामः । ब्रूहि यदुपलब्धम् ।

दुर्मुखः । उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं
महाराजदशरथस्य रामदेवेनेति ।

रामः । अर्थवाद एषः । दोषं तु मे कंचित् कथय येन स
प्रतिविधीयते ।

दुर्मुखः । (सास्रम्) शृणोतु देवः (कर्णे एवमेवम्)

रामः । अहह तीव्रसंवेगो वाग्वज्रः । (इति मूर्छति) ।

दुर्मुखः । आश्वसितु देवः ।

रामः । (आश्वस्य)

हा हा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत्तत्पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥ ३ ॥

तत्किमत्र मन्दभाग्यः करोमि । (विमृश्य सकरुणम्)
अथवा किमन्यत्

सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।
यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४ ॥

संप्रत्येव भगवता वसिष्ठेन संदिष्टम्। अपि च।

यत्सावित्रैर्दीपितं भूमिपालैर्लोकश्रेष्ठैः साधु शुद्धं चरित्रम्।
मत्संबन्धात्कश्मला किंवदन्ती स्याच्चेदस्मिन्हन्त धिङ्मामधन्यम्॥ ५॥

हा देवि देवयजनसंभवे हा स्वजन्मानुग्रहपवित्रितवसुंधरे। हा जनकवंशनन्दिनि हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि हा रामैकजीविते हा महारण्यवासप्रियसखि हा तातप्रिये हा स्तोकवादिनि कथमेवंविधायास्तवायमीदृशः परिणामः।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे॥ ६॥

(दुर्मुखं प्रति) दुर्मुख। ब्रूहि लक्ष्मणमेव ते नूतनो राजा रामः समाज्ञापयति। (कर्णे एवमेवम्)

दुर्मु०। कथमिदानीं अग्निपरिशुद्धाया गर्भस्थितपवित्रपुत्रसंतानाया देव्या दुर्जनवचनादेवमध्यवसितं देवेन।

रामः। शांतम्। कथं दुर्जनाः पौरजानपदाः।

इक्ष्वाकुवंशोऽभिमतः प्रजानां जातं च दैवाद्वचनीयबीजम्।
यच्चाद्भुतं कर्म विशुद्धिकाले प्रत्येतु कस्तद्यदि दूरवृत्तम्॥ ७॥

तद्गच्छ।

दुर्मु०। हा देवि। (इति निष्क्रांतः)।

रामः। हा कष्टमतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः।

शैशवात्प्रभृति पोषितां प्रियां सौहृदादपृथगाशयामिमाम्।
छद्मना परिददामि मृत्यवे सौनिको गृहशकुन्तिकामिव॥ ८॥

तत्किमस्पृश्यः पातकी देवीं दूषयामि।

(सीतायाः शिरः स्वैरमुन्नमय्य बा)

अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं

(सकरुणम्) इदं विपर्यस्तः संप्रति जीवलोकः । अद्य पर्यवसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम् । अशरणोऽस्मि । किं करोमि । का गतिः । हा कष्टम् ।

अथवा ।

दुःखसंवेदनायैव रामे चैतन्यमर्पितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ १० ॥

हा अम्ब अरुन्धति । हा भगवन्तौ वसिष्ठविश्वामित्रौ । हा भगवन् पावक । हा देवि भूतधात्रि । हा तात जनक । हा तात । हा मातरः । हा प्रियसख महाराज सुग्रीव । हा सौम्य हनूमन् । हा परमोपकारिन् लंकाधिपते विभीषण । हा सखि त्रिजटे । मुषिताः स्थ परिभूताः स्थ रामहतकेन । अथवा को नामाहमेतेषामाह्वाने ।

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ११ ॥

योऽहम्

विस्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतंकस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥ १२ ॥

सीतायाः पादौ शिरसि कृत्वा) देवि देवि अयमपश्चिमस्ते रामस्य शिरसि पादपंकजस्पर्शः । (इति रोदिति) ।

(नेपथ्ये) अब्रह्मण्यम् । अब्रह्मण्यम् ।

रामः । ज्ञायतां भोः किमेतत् ।

(पुनर्नेपथ्ये)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥ १३ ॥

रामः । आः कथमद्यापि राक्षसत्रासः । तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्य समुन्मूलनाय शत्रुघ्नं प्रेषयामि । (कतिचित्पदानि

गत्वा पुनः प्रतिनिवृत्य) हा देवि कथमेवंविधा भविष्यसि । भग-
वति वसुंधरे श्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमंगलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ४९ ॥

(इति निष्क्रांतः)

सीता । हा सौम्य आर्यपुत्र कुत्रासि । (सहसोत्थाय) हा धिक् हा धिक् । दुःस्वप्नदारुणोत्कंपितहृदयाहमार्यपुत्रमात्मानं शून्यमिवावलोकये (विलोक्य) हा धिक् । हा धिक् । प्रसुप्तामेकाकिनीं मां प्रमुच्योज्झित्वा आर्यपुत्रो गतः । तत् किमिदमिदानीमिदम् । भवतु कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि । कोऽत्र परिजनः ।

(प्रविश्य) दुर्मुखः । देवि कुमारलक्ष्मणो विज्ञापयति । सज्जो रथः । आरोहतु देवीति ।

सीता । इयमहमारोहामि । (उत्थाय परिक्रम्य) परिस्फुरतीव मे गर्भभारः । शनैर्गच्छामः ।

दुर्मु ० । इत इतो देवी ।

सीता । नमो नमस्तपोवनानां नमो रघुकुलदेवतानां नमो नम आर्यपुत्रचरणकमलानां नमो नमः सकलगुरुजनानां ।

Uttararámacharita I.

XVI.

Description of Alaká.

विद्युत्वंतं ललितवनिताः सेंद्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषम् ।
अंतस्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

हस्ते लीलाकमलमलके बालकुंदानुविद्धं
नीता लोध्रप्रसवरजसा पांडुतामानने श्रीः ।

चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमंते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कंठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥ ३ ॥
आनंदोत्थं नयनसलिलं यत्र नान्यैर्निमित्त-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ४ ॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवंते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गंभीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ५ ॥
मंदाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मंदाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडंते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६ ॥
अक्षय्यांतर्भवननिधयः प्रत्यहं रक्तकंठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशंति ॥ ७ ॥
वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विशेषान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामंडनं कल्पवृक्षः ॥ ८ ॥

Meghaduta II.

XVII.

Surpanakhâ personating Mantharâ.

शूर्पणखा । मायेतिमंथरागीत शूर्पणखाऽहम् । यमिष्टवे-
ष्यामिरागतेन सुरभ्याहमिव । अहो एष परगुणसविस्मयो कपि-
पशुमार्गः रामः (निर्वर्ण्य) अहो गलप्रमाणमाप्यलक्ष्मीपरिमण्ड-
लोद्गतनासाभ्यन्तरसंस्थगुरुत्वाग्निनिर्गतम् । इदानीं चिरकालस्थ-
स्यदुःखदर्शिनमंथरायाः संसर्गादपि अनन्य चारित्रधैर्यमूर्तिं
पुनरपि हृदयं परिस्फुरति ।

रामः (प्रणिपत्य) अयि मंथरे कुशलमम्बायाः ।

शूर्प॰ । सुखं कुशलं च । यत्पतनमात्रेणैव तवानेनैव सम्प्रति ते माता
परित्यज्य दासीमापयति । पुत्रक पुनःप्रतिज्ञामेतां हीं यदि महापापेन
शापयामि । अथ मे विक्रमिदानीं मयत्यंग तातस्य कार्यमेकः ।

लक्ष्मणः (गृहीत्वा धावति)

अस्यैकेन करेण घरततमतो मोक्षाधिराज्यधियः

(स्वगतं ।) कथमेतदार्ये तिष्ठति कनिष्ठस्यार्यस्य भरतस्य राज्य-
प्रार्थनम् ।

(प्रकाशं)

यात्यन्येन विहाय कालहरणं रामो वनं दण्डकाम् ।

(स्वगतं ।) हा अंब किं कृतं त्वयायंमनवरतेन ।

(प्रकाशं ।)

तस्यां धीरधराश्चतुर्दश समाप्तिष्ठस्यसौ त्वं पुनः
सीतालक्ष्मणमात्रकात्यरिजनाद्दृश्यो न वानुव्रजेत् ॥ १ ॥

(स्वगतं ।) हा पापे मातृवंधो ।

सदा मग्नदाशुभलक्ष्मणार्यमुनिः कृताम् ।
संवेनि व्याहानि हित्वा किं कृतं पापया त्वया ॥ २ ॥

मः । अहो प्रसादमकर्णः ।

तत्रैव गमनादेशो यत्र पर्युत्सुकं मनः ।
न चैव विरहो जातः स च वत्सो ममानुगः ॥ २ ॥
लक्ष्मणः । दिष्ट्यानुमोदितोऽहमार्येण ।
रामः । आर्ये मन्थरे एष प्रस्थितोऽस्मि ।

Mahâviracharita IV.

XVIII.

Advice to a king grieved at the death of his beloved queen.

अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥१॥
असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथश्च्युतम् ॥२॥
मयि तस्य सुवृत्त वर्तते लघुसन्देशपदा सरस्वती ।
शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥ ३ ॥
पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ ४ ॥
चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥५॥
स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि ॥ ६ ॥
भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवाना सुरपुष्पदर्शनात् ॥ ७ ॥
क्रथकैशिकवंशसम्भवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥८॥
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥९॥

XVII.

Surpanakhâ personating Mantharâ.

शूर्पणखा । आवेशितमन्थराशरीरा शूर्पणखाऽहम् । वसिष्ठविश्वामित्रगमनेन सुसमाहितम् । अहो एष परशुरामविजयी क्षत्रियकुमारो रामः (निर्वर्ण्य) अहो समग्रसौभाग्यलक्ष्मीपरिग्रहैकसेवनरसायनसौम्यरूपस्याकारनिर्माणम् । इदानीं चिरकालवैरव्यनुबन्धप्रदीप्तमत्सरायाः सौम्यस्यापि अनस्य वार्तिवर्धयन्तुपूर्वि पुनरपि हृदयं परिस्फुरति ।

रामः (प्रणिपत्य) अयि मन्थरे कुशलमम्बायाः ।

शूर्प० । सुखं कुशलं च । यस्मलनाग्रस्नुतस्तनी मध्यमा ते माता परिष्वज्याश्वापयति । पुत्रक पुरा प्रतिज्ञातौ द्वौ वरौ महाराजेन श्रावयामि । अत्र मे विश्वनिदर्शको मयत्येव तातस्य कार्यलेखः ।

लक्ष्मणः (गृहीत्वा वाचयति)

अस्त्येकेन वरेण वत्सभरतो भोक्ताधिराज्यश्रियः

(स्वगतं ।) कथमेतदार्ये तिष्ठति कनिष्ठस्यार्यस्य भरतस्य राज्यप्रार्थनम् ।

(प्रकाशं)

यात्वन्येन विहाय कालहरणं रामो वनं दण्डकाम् ।

(स्वगतं ।) हा धिक् किं कृतं त्वयार्येणमनवरतेन ।

(प्रकाशं ।)

तस्यां चीरधरश्चतुर्दश समास्तिष्ठत्वसौ तं पुनः
सीतालक्ष्मणमात्रकात्परिजनादन्यो न चानुव्रजेत् ॥ १ ॥

(स्वगतं ।) हा पापे मातृबंधो ।

सदा मन्नदानुमलक्ष्मणार्यमुनिः कृताः ।
मंथेति व्याहारं हित्वा किं कृतं पापया त्वया ॥ २ ॥

रामः । अहो प्रसादप्रकर्षः ।

उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ॥ १० ॥
रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥ ११ ॥
अपशोकमनाः कुटुंबिनीमनुगृह्णीष्व निवापदत्तिभिः ।
स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ १२ ॥
मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्यदि जंतुर्ननु लाभवानसौ ॥ १३ ॥
अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ १४ ॥
स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ १५ ॥
न पृथग्जनवच्छुचो वशं वशिनामुत्तम गंतुमर्हसि ।
द्रुमसानुमतां किमंतरं यदि वायौ द्वितयेऽपि ते चलाः ॥ १६ ॥
स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवांतिकमस्य गुरोः ॥ १७ ॥

Raghuvamsha VIII.

XIX.

An account of Kâdambari.

महाश्वेताऽभ्यधात् । महाभाग यत्त्वन्मया कथितमप्सरःसंभवम-प्सरसां कुले तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यकाभूत् । तस्याश्चासौ सकलगन्धर्वकुलमुकुटकुट्टिमपीठप्रतिष्ठितचरणो देवश्चित्ररथः पाणिमग्रहीत् । अपरिमितगुणगणाकृष्टहृदयश्चान्य-वनितादुर्लभेनाग्रमहिषीपदलाञ्छनेन हेमपट्टलाञ्छनेन छत्रचामर-चिह्नेन महादेवीशब्देन परं प्रीतः प्रसादमकरोत् । अन्योन्यप्रेम-

XX

The duties of a king.

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥ २ ॥
अराजके [redacted] लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥ ३ ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ ४ ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ५ ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥ ६ ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥ ७ ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८ ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥ ९ ॥
कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥ १० ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ११ ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥ १२ ॥

तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ १३ ॥

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दंडमसृजत्पूर्वमीश्वरः ॥ १४ ॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पंते स्वधर्मान्न चलंति च ॥ १५ ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥ १६ ॥

स राजा पुरुषो दंडः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥ १७ ॥

दंडः शास्ति प्रजाः सर्वा दंड एवाभिरक्षति ।
दंडः सुप्तेषु जागर्ति दंडं धर्मं विदुर्बुधाः ॥ १८ ॥

समीक्ष्य स धृतः सम्यक् सर्वा रंजयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥ १९ ॥

यदि न प्रणयेद्राजा दंडं दंड्येष्वतंद्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः ॥ २० ॥

अद्यात्काकः पुरोडाशं श्वाऽवलिह्याद्धविस्तथा ।
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम् ॥ २१ ॥

सर्वो दंडजितो लोको दुर्लभो हि शुचिर्नरः ।
दंडस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥ २२ ॥

देवदानवगंधर्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पंते दंडेनैव निपीडिताः ॥ २३ ॥

दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद्दंडस्य विभ्रमात् ॥ २४ ॥

यत्र श्यामो लोहिताक्षो दंडश्चरति पापहा ।
प्रजास्तत्र न मुह्यंति नेता चेत्साधु पश्यति ॥ २५ ॥

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम् ।

समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ २६ ॥
तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्धते ।
कामात्मा विषमः क्षुद्रो दंडेनैव निहन्यते ॥ २७ ॥
दंडो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः ।
धर्माद्विचलितं हंति नृपमेव सबांधवम् ॥ २८ ॥

Manu. VII.

XXI

The rainy season.

तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलंबिनः ।
प्रयांति मंदं नववारिवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ॥ १ ॥
बलाहकाश्चाशनिशब्दभूषणाः सुरेंद्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकैस्तुदंति चेतो ध्वनिभिः प्रवासिनाम्
प्रभिन्नवैदूर्यनिभैस्तृणांकुरैः समाचिता प्रोत्थितकंदलीदलैः ।
विभाति शुक्लेतररत्नभूषिता वरांगनेव क्षितिरिंद्रगोपकैः ॥ ३ ॥
विपाटयंत्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रकामा इव जातविभ्रमाः प्रयांति नद्यस्त्वरितं पयोनिधिम्
तृणोद्गमैरुद्गतकोमलांकुरैश्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि रम्याणि हरंति मानसं विभूषितान्युद्गतपल्लवद्रुमैः ॥ ५ ॥
विपांडुरं कीटरजस्तृणान्वितं भुजंगवद्वक्रगति प्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्विलोकितं प्रयाति निम्नाभिमुखं नवोदकम् ॥ [illegible]
प्रफुल्लपद्मां नलिनीं समुत्सुका विहाय भृंगाः श्रुतिहारिनिस्वनाः
पतंति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया ॥ [illegible]
वनद्विपानां नवतोयदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः सभृंगयूथैर्मदवारिभिश्चिताः ॥ ८ ॥
सितोत्पलाभांबुदचुंबितोपलाः समाचिताः प्रस्रवणैः समंततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयंति भूधराः

प्यासि । भवतु । अन्यतो विचेष्यामि । (अन्यतो विलोक्य) अयमपरो बहुप्रहारनिहतकायोऽकृतव्रणबन्धीकार एव योधसमूह इमं शून्यासनं तुरंगममुपालभ्य रोदिति । नूनमेषामप्येव स्वामी व्यापादितः । तत्र त्वेतेऽपि जानंति । भवतु । अन्यतो गत्वा प्रक्ष्यामि । (सर्वतो विलोक्य) कथं सर्वे एवावस्थानुरूपं व्यसनमनुभवन् भागधेयविमुखतया पर्याकुलो जनः । तत् कमत्र प्रक्ष्यामि कं वा उपालप्स्ये । भवतु स्वयमेवात्र विचेष्यामि । (परिक्रम्य) । दैवमिदानीमुपालप्स्ये । अहो दैवम् । एकादशानामक्षौहिणीनां नायो ज्येष्ठो भ्रातृशतस्य भर्ता गांगेयजयद्रथद्रोणांगराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथिवीमंडलैकनाथो महाराजदुर्योधनोऽप्यन्विष्यते । न जाने कस्मिन्नुद्देशे स वर्तत इति । (विचिन्त्य निःश्वस्य च) अथवा किमत्र दैवमुपालभे । तस्य खल्विदं निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशांकुरस्य शकुनिहतकप्रोत्साहनादिविरूढमूलस्य जतुगृहद्यूतविषशाखिनः संभृतचिरकालबद्धवैरालवालस्य पांचालिकाकेशग्रहणकुसुमस्य फलं परिणमति । (अन्यतो विलोक्य) । यथा अयमपि लूनकेतुवंशो रथो दृश्यते तदहं तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । (उपसृत्य दृष्ट्वा च) जयतु जयतु महाराजः ।

सूतः । (विलोक्य) आयुष्मन् समरात् सुंदरकः प्राप्तः ।

दुर्यो० । (विलोक्य)। अये सुंदरक कच्चित्कुशलमंगराजस्य ।

सुंद० । देव कुशलं शरीरमात्रेण ।

दुर्यो० । (ससंभ्रमम्) सुंदरक किं किरीटिनाऽस्य निहता धौरेयका हतः सारथिर्भग्नो वा रथः ।

सुंद० । न रथो भग्नः । अस्य मनोरथोऽपि ।

दुर्यो० । (सरोषम्) किमेवमसम्बद्धार्थैराकुलमपि मे मनः पर्याकुलयसि । तदशेषतो विस्पष्टं कथय...

कार्णकटेऽनुवर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरस्व तैर्भीमसेने बाष्पाकुला दृष्टिः कुमारवृषसेनेन। उभयबलप्रवृत्तश्च घुकारमपि तेन शरवर्षप्रज्वलितेन गांडीविना तुरगेषु सारथे रपि रथवरे धनुष्यपि ज्यायामपि नरेंद्रलांछने सितातपत्रे व्यापारिताः समं शिलीमुखाः। ततश्च विरथो लूनगुणकार्मुकः परिभ्रमणव्यापारमात्रप्रतिषिद्धशरसंपातो मंडलानि विचरितुं प्रवृत्तः कुमारः। अथ सुभटविध्वंसनामर्षोद्दीपितेन स्वामिना ऽङ्गराजेनागणितभीमसेनाभियोगेन पर्यस्ता धनंजयस्योपरि शिलीमुखासारः। कुमारवृषसेनेनाऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनंजयाभियोगे। भणितं च कुमारेण। रे रे तात- धिक्षेपमुखर मध्यमपांडव मम शरास्तव शरीरमुज्झित्वा अन्य- स्मिन् न निपतंतीत्युक्त्वा शरसहस्रैः पांडवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः।

दुर्यो०। (सविस्मयम्)। अहो बालस्य पराक्रमो मुग्धस्यापि। ततस्ततः।

सुंद०। ततश्च तस्य शरसहस्रपातमवधूय किरीटिना गृहीत रथोत्संगात् कणत्कनककिंकिणीजालझंकारविराविणी विविध- रत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिः सोपहासं विमुक्ता च धनंजयेन कुमाराभिमुखम्। ततः प्रज्वलंतीं शक्तिं प्रेक्ष्य विगलि- तमंगराजस्य हस्तात्सशरं धनुर्हृदयाद्धैर्यसुलभ उत्साहो वदनात् बाष्पसलिलं वदनान्निर्गतं हसितं च धनंजयेन सिंहनादो विना- दितो वृकोदरेण दुष्करं दुष्करमित्याक्रंदितं कुरुबलेन। ततश्च कुमारवृषसेनेन कर्णाकृष्टनिशितक्षुरप्रेण सुचिरं निधार्य अर्धपथे मार्गणैरेव भगवता विषमलोचनेन त्रिधा कृता शक्तिः। एतस्मि- न्नंतरे कलकलकलमुखरेण वीरलोकसाधुवादेनांतरितः समर- तूर्यरवः सिद्धचारणगणविमुक्तकुसुमप्रकरेण प्रच्छादितं समरां- गणम्।

XXIII.

An address to the Supreme Being.

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः ॥ १ ॥
ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ २ ॥
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ ३ ॥
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवम् ॥ ४ ॥
प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥ ५ ॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥ ६ ॥
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ ७ ॥
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥ ८ ॥
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ ९ ॥
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १० ॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ ११ ॥
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ १२ ॥
हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।

दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ १३ ॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ १४ ॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ १५ ॥
चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ १६ ॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ १७ ॥
अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ १८ ॥
शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ १९ ॥
बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २० ॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयः संनिवृत्तये ॥ २१ ॥
प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ २२ ॥
केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २३ ॥
उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ २४ ॥
अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ २५ ॥
महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ २६ ॥

इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ २७ ॥"

Raghuvamsha X.

XXIV.

An old minister's advice to a young prince.

अथ सोऽप्याचचक्षे । देव मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यमानक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः । स च त्रासगद्गदमगदत् । महाभाग क्लिश्यतो मे क्रियतामार्य साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चयन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः तमलमस्मि नाहमुद्धर्तुमिति । अथाहमस्यैव व्रतत्या कयापि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोपहृताभिरद्भिः फलैश्च पंचषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनिषण्णस्तं वृत्तान्तमपृच्छम् । तात, क एष बालः को वा भवान्कथं चेयमापदापन्नेति । सोऽश्रुगद्गदमगदत् । श्रूयतां महाभाग । विदर्भो नाम जनपदः । तस्मिन्भोजवंशभूषणमवतार इव धर्मस्यातिसत्त्वः सत्यवादी वदान्यो विनीतो विनेता प्रजानां रञ्जितभृत्यः कीर्तिमानुदग्रो बुद्धिमूर्तिभ्यामुत्थानशीलः शास्त्रप्रमाणकः शक्यभव्यकल्पारंभी संभावयिता बुधान्प्रभावयिता सेवकानुद्भावयिता बंधून्न्यग्भावयिता शत्रूनसंबद्धप्रलापेष्वदत्तकर्णः कदाचिदप्यवितृष्णो गुणेष्वतिनदीष्णः कलासु नेदिष्ठो धर्मार्थसंहितासु स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्ता प्रत्यवेक्षिता कोशवाहनयोर्यत्नेन परीक्षिता सर्वाध्यक्षाणामुत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः सद्यः प्रतिकर्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्मा नामासीत् । स

यद्वोचत वीक्ष्य मानिनी-परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २ ॥
विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥
परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥
इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥
चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पंकमिवावसीदति ॥ ६ ॥
विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥
द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥
अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥
अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥
क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥
प्रभवः खलु कोशदण्डयोः कृतपंचांगविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥
अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं मतमालंबनमात्मपौरुषम् ॥ १३ ॥
विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥
तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसंपदः ॥ १६ ॥
द्विषतां विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥
मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥
अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषंगिकम् ॥ १९ ॥
ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥
किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥
प्रकृतिः [illegible] प्रमादजम् ।
[illegible] पत्तयः ॥ २२ ॥
[illegible] निवायतः ।
[illegible] न्युतेजसः ॥ २३ ॥
प्रसहेत रणे तवानुजान् [illegible]
ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसंततिः ॥ २४ ॥

Kirâtârjuniyam II.

XXVI.

Chanakya's soliloquy.

चाणक्यः । कथय क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति ।
आस्वादितद्विरदशोणितशोणशोभां
संध्यारुणामिव कलां शशलांछनस्य ।
जृंभाविदारितमुखस्य मु [illegible]
[illegible] रिभूय हरे [illegible] ॥ १ ॥

(शिष्योपनीत आसन उपविश्य नाट्येनात्मगतम्) कथं प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल नंदकुलविनाशजनितरोषो राक्षसः पितृवधामर्षितेन सकलनंदराज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय तदुपगृहीतेन च महता म्लेच्छराजबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति । (विचिन्त्य) अथवा येन मया सर्वलोकप्रकाशं नंदवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा 'प्रतिज्ञासरित्सोऽहमिदानीं प्रकाशीभवंतमप्येनमर्थं न समर्थः किं प्रशमयितुम्'। सोऽहमिदानीमवसितप्रतिज्ञाभारोऽपि वृषलापेक्षया शस्त्रं धारयामि । येन मया मुखे हृदयरोगा इव नव नंदाः समुत्खाताः सरसि कमलिनीव च मौर्ये लक्ष्मीः स्थिरत्वं कृता । अथवा अगृहीते राक्षसे किमुत्खातं नंदवंशस्य किं वा स्थैर्यमुत्पादितं चंद्रगुप्तलक्ष्म्याः । अहो राक्षसस्य नंदवंशे निरतिशयो भक्तिगुणः । स खलु कस्मिंश्चिदपि जीवति नंदान्वयावयवे वृषलस्य साचिव्यं ग्राहयितुं न शक्यते । (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा)। साधु अमात्य राक्षस साधु । साधु श्रोत्रिय साधु। साधु मंत्रिबृहस्पते साधु । कुतः

ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छंत्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासंगेन निःसंगया
भक्त्या कार्यधुरं वहंति बहवस्ते दुर्लभास्त्वादृशाः॥१४॥

अत एवास्माकं त्वत्संग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति । तन्मयाप्यस्मिन्वस्तुनि न शयानेन स्थीयते । यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः । कथमिव अत्र तावद्वृषलपर्वतकयोरन्यतरविनाशेनापि चाणक्यस्यापकृतं भवतीति विषकन्यया राक्षसेनास्माकमत्यंतोपकारि मित्रं घातितस्तपस्वी पर्वतक इति संचारितो जगति जनापवादः । लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तये पिता ते चाणक्येन घातित इति रहसि

अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥ २ ॥
मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशंकया ॥ ३ ॥
आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतीयते ॥ ४ ॥
तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चंद्रोदयाकांक्षी दृष्टांतोऽत्र महार्णवः ॥ ५ ॥
संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ ६ ॥
समूलघातमघ्नंतः परान्नोद्यंति मानिनः ।
प्रध्वंसितांधतमसस्तत्रोदाहरणं रविः ॥ ७ ॥
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते ॥ ८ ॥
ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ ९ ॥
सखा गरीयान्शत्रुश्च कृत्रिमस्तौ हि कार्यतः ।
स्यातामभित्रौ मित्रे च सहजप्राकृतावपि ॥ १० ॥
उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ११ ॥
त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥ १२ ॥
आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ।
कथापि खलु पापानामलमश्रेयसे यतः ॥ १३ ॥
विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ १४ ॥
मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति ॥
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ १५ ॥

कथाः कुर्वन्तस्तत्र जिज्ञासया विद्यागोष्ठीर्भावयन्त कदाचिदसं-
गतं । मन्दपालेन च तं त्रिभुवनवन्दनीयं गते समवायानुगुण-
मन्त्रवादरताः सर्वे च सर्वतिथ्यानुगुणनुनः विरेजिरे । वि-
विधं यथारम्भस्य यत्र देवानामन्यतमस्य विवादाः प्रादुरभूवन् । अथ
विरोधिनः प्रवृत्ता महान्तः मुनिरत्रैकतमस्मात्कोपनोऽत्र मन्द-
ठितो देव अंशुमता मुनिना सह कलहायमानः साम गायन् कोप-
पापो विस्वरमकरोत् । सर्वेषु शापभयप्रतिपन्नमौनेषु मुनिषु देवी
सरस्वती तत्र मुग्धा जहास । दृष्ट्वा तु तां तथा हसन्तीं स
मुनिः तां दृष्ट्वातिमत्सरात्पराङ्मुखीं दृष्टिक्षेप मानसस्तम्भनी-
स्तुकथा कोपानलाग्निशिखया कोपानलमालां विक्षिप्य कमण्डलोर-
वारिणा समुपस्पृश्य शापजलं जग्राह ।

अत्रान्तरे स्वयंभुवोऽभ्याशे समुपविष्टा देवी सावित्री सह सर-
कोपोपरक्तदुर्वासनाम्नस्तस्य मुनेर्विलोक्य कलयन्त-
जिलांचलक्षः सकलसुरासुरमुनिमनुजधर्मधात्री त्रिभुवनजननी स-
रस्वती शापयितुमनिलसमयं गुरुं तां भूमीमहाय समुत्थाय । अत्र स-
र्पेव भगवन्भूमिर्मया मापकुरु अनुशापयमानोऽपि तावदेवाग्-
न्यतिक्रमं कृतवती सखी बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि शिष्यैः पु-
मा कृथास्तावत् प्रवृद्धमिति निवार्यमाणोऽप्यतिमात्र रोष-
विवशो दुर्वासा दुर्विनीते व्यपनयामि ते विद्यावलेपमेतं विद्या-
जनितामुन्नतिमधस्तादच्छ मर्त्यलोकमित्युक्त्वा तच्छापोदकं वि-
ससर्ज । ततः प्रतिशापदानोद्यतां च सावित्रीं सखि संहर क्रोधं
संस्कृतमतयोऽपि आर्यस्य द्विजन्मानो माननीया इत्यभिदधाना
सरस्वत्येनां न्यवारयत् । अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा
पितामहः सधीरमुवाच । ब्रह्मन् खलु साधुसेवितोऽयं पन्था
येनासि प्रवृत्तः । पुरस्तादुद्दामप्रवृत्तेन्द्रियाश्वोपजनितं रजः
कलुषयति दृष्टिमनक्षजिताम् कियद्दूरं वा चक्षुरीक्षते । विशुद्ध-
धिया पश्यन्ति कृतबुद्धयः सर्वानसतः सतो वा । निसर्गविरोधिनी

अर्थातुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न वेला ॥ २ ॥
कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते ।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ३
निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वांछति ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वांछति
ब्रह्मा शैवपदं शिवो हरिपदमाशावधिं को गतः ॥ ४ ॥
यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा ॥ ५ ॥
याति न्यायप्रवृत्तस्य तिर्यंचोऽपि सहायताम् ।
अपंथानं तु गच्छंतं सोदरोऽपि विमुञ्चति ॥ ६ ॥
स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ ७ ॥
अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ।
ननु संति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥८॥
गुणालयोऽप्यसन्मंत्री नृपतिर्नाधिगम्यते ।
प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः ॥ ९ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
विकसति यदि पद्मं पर्वतानां शिखाग्रे ।
प्रचलति यदि मेरुः शीततां याति वह्नि-
र्न चलति खलु वाक्यं सज्जनानां कदाचित् ॥ १० ॥
उपेक्षितः क्षीणबलोऽपि शत्रुः प्रमाददोषात्पुरुषैर्मदांधैः ।
साध्योऽपि भूत्वा प्रथमं ततोऽसावसाध्यतां व्याधिरिव प्रयाति ॥
गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पंडितेन ।

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ २१ ॥
अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति ।
रविरपि न दहति तादृग्यादृग्दहति वालुकानिकरः ॥२२॥
क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितं
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।
क्वचिद्रामा रम्या क्वचिदपि जराजर्जरतनु-
र्न जाने संसारः किममृतमयः किं विषमयः ॥ २३ ॥
कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वापि गोरोमतः
पंकात्तामरसं शशांक उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छंति किं जन्मना ॥
योद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमंगे सुभाषितम् ॥ २५ ॥
तृणानि नोन्मूलयति प्रभंजनो मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम् ॥२६॥
गुणायंते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायंते किमिति जगतां विस्मयपदम् ।
यथा जीमूतोयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥ २७ ॥
दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुंचति चेतनाम् ।
ज्वलयति तनूमंतर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृंतति जीवितम् ॥ २८ ॥
यस्मिन्कुले यः पुरुषः प्रधानः स सर्वयत्नैः परिरक्षणीयः ।
तस्मिन् विनष्टे स्वकुलं विनष्टं न नाभिभंगे ह्यरका वहंति ॥ २९ ॥

जन्मं विद्वानेकः सकलमभिसंधाय कपटै-
स्तटस्थः स्वानर्थान्घटयति च मौनं च भजते ॥ ३९ ॥

किं कापि प्रलयानलैर्विघटितो निर्भिन्न मर्म्मीकृताः
किंस्विद्धंसगजेन पंकजवनं निष्कंदमुन्मूलितम् ।
किं वा हंत कृतांतकेसरिभयात्त्यक्तो मदः कुंजरै-
र्येनास्मिन् विरसे करीरकुसुमे [redacted] भृंग विश्राम्यसि ॥४०॥

इहानेके सार्थं सततमुपकारिण्युपकृति
कृतज्ञाः कुर्वंतो जगति नियतं संत्येव सुधियः ।
कियंतस्ते संतः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ४१ ॥

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरा प्रकटितगंभीरचिंतातटी
तस्याः पारगता विशुद्धमनसो नंदंति योगीश्वराः ॥४२॥

प्रथमवयसि पीतं तोयमल्पं स्मरंतः
शिरसि निहितभारा नालिकेरा नराणाम् ।
उदकममृतकल्पं दद्युराजीवितांतं
न हि कृतमुपकारं साधवो विस्मरंति ॥ ४३ ॥

मज्जंतोऽपि विपत्पयोधिगहने निःशंकधैर्यावृताः
कुर्वन्त्येव परोपकारमनिशं संतो यथाशक्ति वै ।
राहोरग्रकरालवक्त्रकुहरग्रासाभिभूतोऽप्यलं
चंद्रः किं न जनं करोति सुखिनं प्रासादशेषैः करैः ॥ ४४ ॥

अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ ४५ ॥

गुणिनामपि निजरूपप्रतिपत्तिः परत एव संभवति ।
स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात् ॥ ४६ ॥

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुंबी
चादर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।
सत्कर्ता नावमंता पुरुषगुणनिधिर्दक्षिणोदारसत्वो
ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसंतीव चान्ये ॥४७॥

वंशस्तुर्वैर्व्यवसस्तुरंगात्कोटिस्थमित्रोविपतो विमोहः ।
इति विपाऽशिाशे सहोदरेभ्यो जाने न कस्माद्गुणवद्विरोधः॥४८॥

गंधाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
तां दृष्ट्वाशु गतः स चंदनवनं पश्चात्सरोजं गतः ।
बद्धस्तत्र निशाकरेण सहसा रोदित्यसौ मंदधीः
संतोषेण विना पराभवपदं प्राप्नोति सर्वो जनः ॥ ४९ ॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते ।
नान्यामंगुलिमभ्येति संख्यायामुद्यतांगुलिः ॥ ५० ॥

नमते विद्यामधिकेन शिमस्तद्गुणरेशमयथा कुशलः ।
मुखमिंदुरज्ज्वलकपोलमतः प्रतिमाच्छलेन सुदृशामविशत् ॥५१॥

गुरुसहायः कार्याते क्षोदीयानपि गच्छति ।
संभूयांभोधिमभ्येति महानद्या नगापगा ॥ ५२ ॥

मये तावत्सेव्यादभिमिथिनीत सेवकजनं
ततः प्रत्यासन्नाद्भवति हृदये चैव निहितम् ।
ततोऽप्यारूढानां पद्मसुजनोद्वयजननं
गतिः सोच्छ्रयाणां पतनमनुकूलं कलयति ॥ ५३ ॥

भैतव्यं नृपतेस्ततः सचिवतो राजस्ततो वल्लभा-
दन्येभ्यश्च वसंति येऽस्य भवने लब्धप्रसादा विटाः ।
दैन्यादुन्मुखदर्शनापलपनैः पीठार्धमायस्यतः
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ॥ ५४ ॥

दोषाकरोऽपि कुटिलोऽपि कलंकितोऽपि
मित्रावसानसमये विहितोदयोऽपि ।

चंद्रस्तथापि हरवल्लभतामुपैति
नैवाश्रितेषु महतां गुणदोषशंका ॥ ५५ ॥
लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
[illegible]

मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशुसंधेयः ॥ ५७ ॥
पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रांतं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चंद्रः पतति गगनादल्पशेषैर्मयूखै-
र्दूरारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुददलचयैः फुल्लांभोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शाष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् वृक्षाणां वरं मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवैरिता ॥ ६० ॥
आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नैति परोपभोगसहतामेषा ततस्तां तथा
ज्ञात्वा ते हृदयं द्विधा दलति यत्तेनासि वंद्यो भवान् ॥ ६१
अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणाय वृत्तिर्यस्य जने जनितस्याहेऽपि ॥ ६२ ॥
भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गंधवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३
दस्त इव भूतिमलिनो यथा यथा लंघयति खलः सुजनम्
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

शमयति गजानन्यान्गंधद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजंगशिशोर्विषम् ।
भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः ॥ ६५ ॥

सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः ।
तदपि तत्क्षणभंगि करोति चेदहह कष्टमपंडितता विधेः ॥ ६६ ॥

धवलयति समग्रं चंद्रमा जीवलोकं
किमिति निजकलंकं नात्मसंस्थं प्रमार्ष्टि ।
भवति विदितमेतत्प्रायशः सज्जनानां
परहितनिरतानामादरो नात्मकार्ये ॥ ६७ ॥

येनाश्लिष्टं कमलकुमुदोन्मीलने पुष्पवंतौ
विश्वं लोकैः स्नपयितुमसौ केन वा वारितः स्यात् ।
विश्वानंदोपचयचतुरो दुर्जनानां दुरापः
भ्रात्यो लोके जयति महतामुज्ज्वलोऽयं निसर्गः ॥ ६८ ॥



मंगलमपि हरणाद्गमनानुवेति
नेत्राधिश्रु महतां गुणरत्नाकरा ॥ ५५ ॥
आयत्यौकसि संचलन्नपि मरुन्मन्दोऽपि तस्मिन्नपि
येन स्वस्य श्रीवसनगुप्ते निशाविने वेगतः ।
इन्दुः किं पतितः किमेष विहितः पूषा किमुत्पादितं
निशाकरनयनो शुभ्रश्च किमयं मृगाः कुमुदसम्भृताः ॥ ५६ ॥
शुद्धपदपङ्गुलमैत्री दुःसंपादस्य दुर्जनं भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्याशुसन्धेयः ॥ ५७ ॥
पातालात् प्रतिमोचितो गुरुभिः कृत्वा मुखैः
कान्तं येन अपि लक्ष्मणा मध्यमे धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्याकाङ्क्षिणि अति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
नागमेषु निगमेषु पांशुनं कज्जलामगुणयत्र मज्जनः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुदवनपलैः फुल्लाम्भोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् वृक्षाणां करभसघनां
परिचयरतिः सा दुर्धीः न सा गुणवैरिता ॥ ६० ॥
आपुष्पमसमानमनोहरतया श्रियास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नेति परीप्तमांगसहतामेषा मनस्वा तथा
यावत् ते हृदयं द्विधा वसति यस्तमाक्षितंयो मवान् ॥ ६१ ॥
अगुरुरिति यस्तु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणाय धूर्तैयस्य जनेन जनितत्रासेऽपि ॥ ६२ ॥
भानुः सरद्धुरतुरंग एव रात्रिन्दिवं गंधवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
हस्त इव भूतिमलिनो यथा यथा लंघयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

नमति गजाभन्याम्भोधरिः कल्मोऽपि सन्
ददाति सुतरां येनोद्धं भुजंगादिशोऽविषम् ।
सुषमधिपतिर्लोलायन्धोऽप्यलं परिरक्षितु
न खलु वयसा ज्ञायेयायं स्वकार्यसहो भरः ॥ ६५ ॥
कृतीति तावद्दोषगुणाकरं पुरुषरत्नमलंकरणं भुवः ।
तदपि तत्क्षणभंगि करोति चेदहह कष्टमपंडितता विधेः ॥ ६६ ॥

धवलयति समग्रं चंद्रमा जीवलोकं
किमिति निजकलंकं नात्मसंस्थं प्रमार्ष्टि ।
भवति विदितमेतत्प्रायशः सज्जनानां
परहितनिरतानामादरो नात्मकार्ये ॥ ६७ ॥
केनादिष्टौ कमलकुमुदोन्मीलने पुष्पवंतौ
विश्वं लोकैः स्नपयितुमलं केन वा वारिवाहः ।
विध्यातेदोषपथघनतो दुर्जनानां दुरापः
महाशयो लोके जयति महतामुज्ज्वलोऽयं निसर्गः ॥ ६८ ॥



चंद्रस्त्वयापि हृदयाद्गमनागुरंति
नैवाधिनेषु महतां गुणदोषवार्ता ॥ ५५ ॥
लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इंदुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ ५६ ॥
सुहृदयसुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशुसंधेयः ॥ ५७ ॥
पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रांतं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चंद्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुदवनचयैः फुल्लांभोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् वृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवैरिता ॥ ६० ॥
आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नैति परोपभोगसहतामेषा गतस्तां तथा
बाला ते हृदयं द्विधा दलति यत्तन्नातिचित्रं भयात् ॥ ६१ ॥
अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणैव वृत्तिर्यस्य जने जनितदाहेऽपि ॥ ६२ ॥
भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गंधवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
हस्त इव भूतिमलिनो यथा यथा लंघयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६५ ॥
[illegible] ।
[illegible] ॥ ६६ ॥

धवलयति [illegible]
[illegible] प्रमार्ष्टि ।
[illegible]
[illegible] ॥ ६७ ॥
[illegible] पुष्पदंती
[illegible] ।
[illegible] दुरापः
[illegible] ॥ ६८ ॥

यं द्रष्टुमपि ह्रस्पाहुगमागुणैरिति
नैराश्यिनस्तु महतां गुणश्लोकशालिनः ॥ ५५ ॥
लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ ५६ ॥
मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशुसंधेयः ॥ ५७ ॥
पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
नागमेषु निलयेषु वासुषु कुड्मलामसुमयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुदवनचयैः फुल्लाम्भोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् वृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्योगा न सा गुणवैरिता ॥ ६० ॥
आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नैति परोपभोगसहतामेषा ततस्त्वां तया
ज्ञात्वा ते हृदयं द्विधा दलति यत्तन्नातिचित्रं मयात् ॥ ६१ ॥
मधुररिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणाय धूलिर्यस्य जने जनितश्राद्धेऽपि ॥ ६२ ॥
भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
हस्त इव भूतिमलिनो यथा यथा लंघयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

स्पर्धि समासम्यात्मधिष्ठितः कस्मोऽपि तम्
मर्त्ये न सुभर्ता देशोद्धं भुवेऽलङ्कृतोऽविषम् ।
दुष्कर्मविधिनिर्वाणोपवर्गोऽप्यहो परिहर्तुं
न तु वदता ज्ञातेधायं वदतामपरे मतः ॥ ६५ ॥
दुष्टेन भावदोषयुक्तस्य दृष्टवद्यमानं वक्ष्ये मुदः ।
सर्व नमस्करोमि न रोमि येऽदद न धर्मपंडितता विधिः ॥ ६६ ॥

प्रपलपन्ति तरुणे चन्द्रमा औदलोपः
विर्भान्ति निश्चलैः नागपतिरपं प्रमाणे ।
मर्दन्ति विदितमर्मन्याप्यतः सप्रमाणां
परिहतविनताप्रमादपरो नाममार्थे ॥ ६७ ॥
ये नाविद्यं श्रमदद्गुणेभ्योऽपि पुष्पवन्तौ
विश्वं लोके समविनष्टमतां वाम वा वारिवाद ।
विभ्रमेऽरीपवयवयतां दुर्जनानां गुणपः
भगवतो लोके जयति महतागुरुपयसोऽप्ये विरतौ ॥ ६८ ॥



चंद्रस्तनपाति हस्यदुन्नतामुर्वीति
नैवाश्रितेषु महतां गुणदोषशङ्का ॥ ५५ ॥
न्यायपथीकृति चंद्रनापगापि मध्यप्रभावे स्वामिनी
देव स्वयंवर्मीमरस्ययमुंशे निष्पादिते वेधसा ।
इंदुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिंतारत्नमहो मुधैव किमभी सृष्टाः कुलक्ष्माभृतः ॥ ५६ ॥
सुरघटयत्सुमभेदो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशु संधेयः ॥ ५७ ॥
पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रांतं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चंद्रः पतति गगनादल्पशेषैर्मयूखै-
र्दूराकृष्टिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुदकमलैः फुल्लांभोजैः सरोभिरलंकृतां
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् मृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवर्जिता ॥ ६० ॥
आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावद्येति परोपभोगसहतामेषा ततस्तां तथा
ज्ञात्वा ते हृदयं द्विधा दलति यत्तेनातियोग्यो भवान् ॥ ६१ ॥
अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणैव वृत्तिर्यस्य जने जनितदाहेऽपि ॥ ६२ ॥
भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
दृश्यत इव मूर्तिमलिनो यथा यथा लंघयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

स्फुरति सकलमस्याकाशयदिशः करशोटति सम्
स्पर्शे सुमतं दंतोत्थं मुक्ताशितोऽविम्यम् ।
सुवर्णवर्णनिकोलायवसंपन्नां संस्थितं
न खलु ददता कादियायं ददतांमदो भवः ॥ ९५ ॥
सुकृति सावकशावगुणावर्द्ध दृष्टसनममसंपदो भुवः ।
स्वीय मनसम्मति च रोति दंददद कल्पसपंडितना विधिः ॥ ९६ ॥
धवलयति समये चंद्रमा जीवलोकं
दिवसिन निजकरैर्वं भास्करोऽयं प्रभाति ।
मयति विदितमेनस्यापदः सज्जनानां
पादितनिरनाभाशायों भाग्यकार्ये ॥ ९७ ॥
केनादितो कमलपुष्पहोन्मीलने पुष्पयंतो
दिग्धं नीयः समयविनमस्ते कत या वारिवाद ।
विश्वानंदोपचयचयनतो दुर्जनानां दुरापः
महात्मो लोके जयति महतामुज्ज्वलोऽयं निसर्गः ॥ ९८ ॥



चंद्रस्त्वंयापि ह्रस्यत्वमासुदेति
  नैवाधिनेतु महतां गुणदोषशंका ॥ ५५ ॥
लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इंदुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ ५६ ॥
मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशुसंधेयः ॥ ५७ ॥
पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रांतं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चंद्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥
गागमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ ५९ ॥
कुमुदवनपलैः कुड्मलाभिः सरोभिरलंकृतां
मरकतमणिश्यामां हाप्यैर्विहाय वनस्थलीम् ।
रमरति करभो यद् वृक्षाणां चरत्मदगन्धकां
परिचयरतिः सा दुर्वारा न सा गुणवरिता ॥ ६० ॥
आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नेति परोपभोगसहतामेषा ततस्तां तथा
ज्ञात्वा ते हृदयं द्विधा दलति यच्चेतनातिर्यंचो भवान् ॥ ६१ ॥
अगुरुरिति यद्नु लोको गौरवमत्र पुनरहं मन्ये ।
दर्शितगुणश्च युक्तिर्यस्य जने ज्वलितदाहेऽपि ॥ ६२ ॥
भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गंधवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
हस्त इव भूतिमलिनो यथा यथा लंघयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६५ ॥
[illegible] मुदा ।
[illegible] ॥ ६६ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६७ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६८ ॥

